बिल्वमंगलम्

(गद्यकाव्यम्)

आचार्य उमेश शास्त्री

बिल्वमंगलम्

आचार्य उमेश शास्त्री
संस्कृत-विभागाध्यक्षः
श्री स्व० गो० पारीक महाविद्यालयः
जयपुरम्

श्रीनाथ-प्रकाशनम्, जयपुरम्

प्रकाशक :
श्री नाथ प्रकाशनम्
चाह बोरड़ी मार्ग,
गणगौरी बाजार, जयपुरम्

विल्वमंगलम्

(संस्कृत–गद्यकाव्यम्)

उमेश शास्त्री

संस्करणम्
1986

मूल्यम्
त्रिंशत् रूप्यकाणि

मुद्रक :
रसकपूर प्रिन्टर्स
जयपुरम्

राजस्थान संस्कृत - साहित्य - सम्मेलनस्य
प्रकाशन - योजनान्तर्गतं
गद्यकाव्यं
मुद्रितमिदम् ।

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय! प्रतिजानिहि न मे भक्तः प्रणश्यति ।। गीता/9-31

संस्कृते संस्करणाय, भावसौन्दर्यवर्धने ।
लालित्य-सहयोगाय बक्षीरामश्च धन्यभाक् ।।

वस्तुतोऽभूत् मंगलमयो बिल्वमङ्गलः ।
चिन्तानाशिनी माणिरिव चिन्तामणिः ।।

मयि ये स्निह्यन्ति चात्मीयास्तेभ्यो नित्यं समर्पितः ।
गृह्णातु तावन्मद्यष्टिं प्रापयिष्यामि त्वीप्सितम् ।।

चिन्तामणिर्जयति सोमगिरिर्गुरूर्मे,
शिक्षागुरूश्च भगवान्छिखिपिच्छमौलिः ।
यत्पादकल्पतरूपल्लवशेखरेषु,
लीलास्वयंवररसं लभते जयश्रीः ।।

—'बिल्वमंगलम्'

हस्तमुत्क्षिप्य यातोऽसि बलात्कृष्ण! किमद्भुतम् ।
हृदयाद् यदि निर्यासि पौरूषं गणयामि ते ।।

चिन्तामणिः कृष्णरसैकरूपिणो,
सुभक्त कृष्णायित-बिल्वमङ्गलः ।
चिदात्मसौन्दर्यसमीक्षणे सति,
किमस्ति बाह्यान्तरभेदभंगिमा ।।

१

अस्ति कृष्णावेणी-सरित्तीरे सघन-तरु-समावृतः कश्चिल्लघुग्रामः। तत्रैकतः कदलीवनालि-श्लिष्टा श्रमिकवसतिः, कुत्रचिन्नाविक-वितानानि, क्वचन कृषकोटजानि, अपरतश्च पण्डितानां वणिजां च वेश्मानि निर्मितान्यासन्। नदीतीरोपलसिते विशाल मन्दिरे कृष्णस्य श्याम-प्रतिमा प्रतिष्ठिताऽसीत्। नातिदूरं शिवालयोऽपि शुशुभे। यद्यपि कृष्णासरितः प्रवाह-धारा एकवेणीरूपा प्रवहतिस्म, किन्तु मन्दिरद्वये पृथक्-पृथक् विभाजिता भक्तधारा परस्परं सम्मिलितुं नैहते। अन्यान्य-मन्दिर-प्राङ्गणयोरपि नाविशन्ति धर्मान्ध-विमोहिताः जनाः। सामयिक-समुत्सवेषु प्रबलभक्तंमन्यानां कदम्ब कोलाहलैः कवलितः सकल-ग्रामपरिसरो विकलायते स्म। शैवाः वैष्णवाश्च स्वधर्मदम्भ दुन्दुभिं डिमडिमायन्ते स्म।

कृष्णमन्दिरस्य वैभव मपेक्षाकृतं सुस्थितमवर्तत। मन्दिर-प्राङ्गणे बहुल भक्त संकुला दीर्घावलिर्दर्शनविह्वला उपासते स्म। प्रतिमा-पूजानन्तरं तण्डुल-मृदुलः प्रसादः सर्वेभ्यो वितीर्यते स्म। ब्राह्मणवर्गे रामदासः संस्कृत-विशारदः श्रेष्ठविद्वांश्च प्रथितः। वेद-पुराण-मीमांसा दर्शनानां पाण्डित्येन सह रामदासो मधुर-कथावाचकोऽप्यासीत्। प्रत्युषसि स्नानवेलायां सरित्तीरे सुमधुरस्वरैः वैदगान स्तवैर्जगत्कल्याणं कामयते स्म। उषःकिरणविबोधिताः विविधखग-गणा अपि कलरवतरंगैः ऋक्-संगीतसाहाय्य-मिवाचरन् तदा।म्। तदनु देवालयेऽपि पूजनघण्टा-घोषो विजृम्भते स्म। उपासकाः ऋक्-गानपुरःसराः भगवन्तं श्यामसुन्दरं बिबोधयितुं व्यस्ताः अभवन्। सिंहद्वार-प्राचीरे शिवनान्दी (सहनाई) मृदंगमदुरो ध्वनिः रूत्ताम्यते स्म। भगवद्दर्शनाभि-लाषिणां जयघोषैरापूर्यत नभः। एतदन्तरे पण्डित रामदासः श्वेत-धौतिकावृतः पृथुल-विततवेणीं वेष्टयन्, पाण्डुर-तिलकं चर्चयंश्च दारू-पादुकोपनद्धो मन्दिरं प्रत्यागच्छत्। देवालयालिन्दे शिरः स्पर्शन् साष्टाङ्गप्रणतिं समाचरत्। भगवतो मंगलनीराजना पर्यन्तं विष्णु स्तोत्रं समभणत्। देवार्चनानन्तरं प्राङ्गणपर्यंक प्रसृते

मृदुलतूलपीठे समुपविश्य श्रीमद्भागवतादिपौराणिककथानां प्रवचनं समारभत । कश्चिदपि दर्शनार्थी श्रवणप्रियं तत्प्रवचनम् अश्रुत्वा नागमत् । निमीलित पक्ष्मस्पन्दः सः प्रभुं स्मरन् प्रवचन पुरःसरं मंगलाचरणमगायत्—

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकी-परमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।

अथ च जगज्जीव-ब्रह्म-विवेचनात्मकं स्वप्रवचनं समाप्य गृहं प्रतस्थे; यत्र साध्वी तत्पत्नी कृष्णनामकीर्तने निरता समयं यापयति स्म । रामदासो भार्याननस्य मालिन्यं चित्तोद्वेगं च प्रथमदृष्टिनैव संभाव्य नितरामुदासीनोऽभवत् तदैव वाक्यं सदैव न्यगदत्—"गहनाऽस्ति हरे मया " श्रुत्वैतत् पत्नी-पक्ष्माणि सान्द्राणि समजायन्त, परं सा न किमप्यवोचत् । शनैरूत्थाय भगवत्प्रतिमासम्मुखमास्ते स्म । दीर्घं निःश्वसन् पण्डितः प्राब्रोचत्—"भाग्यवति ! यत्किंचिदपि प्राप्तं नः तस्मिन्नेव मुदं वह" ।

–अप्यस्मिन् प्रांगणे शून्यतैव भविता ? कराञ्जलिं कम्पयन्ती गद्गद् स्वरेण सा प्रतिमामयाचत ।

–"ग्रहयोग एवेदृशः ।"

–"भवान् तु सदैव भणत्येवमेव । किन्तु मयाद्य जन्मपत्री पण्डित-मार्कण्डेय महानुभावानां सम्मुखं प्रस्तुता ।"

–"किं कथितं तेन विदूषकेन ?"

–"भगवति त्र्यम्बकेश्वरे बिल्वपत्र समर्पणात् साफल्यं शक्यते ।"

–"आह ! धूर्तस्यैषा नवानीतिः । भाग्यवति ! कथं नावजानासि यत् सः मां पथः विचालयितुं प्रयतते ।

मां शिवभक्तं प्रख्याय मत्प्रतिष्ठां धूलिधूसरयितुमीहते । भवन्ति तादृशाः मायाविनः संसारे । ये प्रत्यक्षमवशाः, प्रलोभप्रवंचनाव्याजेन गृहे प्रविश्य दारान् आश्वासयन्तः तन्मर्मवेदना मनुश्रृण्वन्तः प्रकारान्तरेण विजिगीषवो भवन्ति । तद्-धूर्तयोजनां सफलयितुं नोत्सहिष्ये ।

–"माऽमर्षं कुरूताद् भवान् ।"

–"भाग्यवति ! त्वया विधर्मिणो गृहे नैव प्रवेशनीयम् ।"

–"स्वामिन् ! मयेदृशोऽपराधो न विहितः ।"

–तर्हि किं तेनात्रागमनाय दुःसाहसयितम् ।

–प्रसाद-प्रदानाय आगतवान् ।

–भाग्यवति ! स नितान्तं धूर्तः । अनेकबारं शास्त्रार्थे मां पराजेतुं प्रायतिष्ट, किन्तु भगवत उपेन्द्रस्य असीमानुकम्पया स्वकीय कुतर्कैरेव पराजितोऽभूत् ।

–स्वामिन् ! भवान् एव सदा भणति यत्–विविधरूपेषु विराजते भगवान् । ततः पुनर्भगवतो भिन्नरूपाय कथं द्रुह्यति ।

–चतुर्भुजस्योपासकोऽहम् ।

–त्रिमूर्तिरपि तस्यैव रूपम् ।

–अस्ति; किन्तु अस्मत्सम्प्रदायस्तं नैव स्वीकरोति ।

–भगवतो विविधरूपाणि, मनुष्याणां च विभिन्न-सम्प्रदायाः । परस्परं द्रुह्यन्ति, जुगुप्सन्ति च ।

स्वामिन् ! भवतश्चतुर्भुजभगवता तु अधावधि कृपा नैव प्रदर्शिता, सम्भाव्यते यत्–भगवान् त्रिपुरारिरेव मनोरथं पूरयेत् अतो भवान् धर्मान्धभावनामिमां परित्यज्य मामनुमोदयतु ।

–भाग्यवति ! स्त्रीहठोऽयम् ।

–नहि, इयं ममताऽकांक्षा ।

–चेत्-मदीया प्रतिष्ठा ?

–"स्वामिन् ! भवतोऽयं धर्महठः । विश्वसिमि यत् भगवान् शिवो मदीय बन्ध्याकुक्षिं फलवतीं विधास्यति । अपि भवान् इदमेवाकांक्षते ? यद् मामाजीवनं वेदनेयं कदर्थयतु, समाजस्य तिरस्कार दृष्टि शराश्च विकलयन्तु । स्वर्ण-रजत-रत्नाहर्-वसनेभ्यस्तु नाहं याचे, केवल मुपासनानुमतिं प्रार्थये । अपि च–भवन्तं नावरून्धामि शिवालयस्य बहिरलिन्दमपि स्पष्टुम्–"एवं कथयन्त्यास्तस्याः नयनयोः जलधारा प्रवहिता ।

मार्कण्डेय ! अद्याऽभूः विजयी । पुरुषः प्रकृत्याः सम्मुखे सदा पराजयते । भाग्यवति ! त्वं शिवमुपास्यसे किन्तु शिवालयं कदापि नैव गमिष्यसि ।

–कथमेतत् संभाव्यते ?

–श्वोऽहं सरित्तीरात् पाषाणमेकमानयिष्यामि, तमेव शिवलिंगभावनया पूजयित्वा गृहे वसन्ती पूजां समाचरिष्यसि ।

–भगवतोऽपमानम् ?

–नहि भाग्यवति ! स्वयमहं तत्र प्राणप्रतिष्ठां विधास्ये ।

–अपि सत्यम् ?—"विस्फारितनयना सा पतिमुखं निरैक्षत ।

–भाग्यवति ! अहमपि सहृदयमानवः । मन्मनसि चापि शुभाकांक्षाः तरंगयन्ति । स्व शून्याङ्गणे सुविकसितं सुवासितं पाटलपादपमहमपि दिदृक्षुः । एतदर्थं त्वां नावरून्धामि ।

–तत्पुनः शिवालयं गन्तुं कथ मवरून्धति भवान् ?

–बाह्य प्रतिष्ठाभंगात् । धर्मदम्भे जीवितोऽहम् । धार्मिक-मर्यादा एव मदीया सामाजिकमर्यादाः संजाताः, एतद्बहिरहं जीवितुमक्षमः । भगवतः कृष्णस्य सेवायां प्रतिपल मामोदमावहामि । एतद् बिना किमपि नैव रोचते मह्यम् ।

–तया किमपि नोत्तरितम् । विजयभावना-त्वरिता प्रमुदिता गृहस्थकार्येषु व्यापृता ।

अन्येद्युः पण्डित रामदासः शिवाकृतिप्रस्तरमेकमानीतवान् । वैदिक-मंत्र स्तवैः प्राणप्रतिष्ठां व्यरचत्, किन्तु मनस्युद्वेगभार इव प्रतीयते स्म । भाग्यवती प्रतिदिनम् प्रातः शिवार्चनां चरति स्म, विल्वपत्राणि समर्प्य, भववः शिवाद् एकामेव प्रार्थनाञ्च याचते स्म ।

पंडित रामदासोऽपि मनस्येव तदयाचनां चकार । यथासंभवं भावनामिमां जुगोप च । पंडितमार्कण्डेयं चापलापै र्दूषयामास, तावत् सः स्वगृहं नागच्छेत् । मासपूजां समाप्य यदा शिवप्रतिमां कृष्णावेण्यां प्रवाहयामास, तदानीमेव सुखेन निःश्वसति स्म ।

तदानीं तु विस्मितोऽभूत् सः, यदा भाग्यवती गर्भाधानं सूचयामास । अपार हर्षमनुभवन्नपि अन्तर्मनसि पराजयपीडया उद्वेलितोऽजायत ।

\+ \+ \+

२

अभूत् प्रभूत-मोदभरः पुत्र-जन्मोत्सवः । हरितपर्णावलयो वन्दनद्वारेषु दोलायमानाः अराजन्त । कदलीस्तम्भ-कदम्बमन्तरा कुसुमाऽकलिताऽष्टदले रतज-कलशमध्यास्ते । कलशाभिमुखं विविधशृंगार-सुसज्जिता विष्णु-प्रतिमा विराजिताऽसीत् । पार्श्वभागे शिवपुष्पचयाच्छदा शिवप्रतिमाप्यासीत्, किन्तु सहजतया तद्-दर्शनमसम्भवमेवाऽवर्तत । बभ्रु-धूरि-निर्मितां वेदिकां परितः ऋत्विजामासनानि विस्तृतान्यासन् । यज्वने मृगासनमपि तत्रासीत् । यस्योपरि सदारः पण्डित-रामदास उपाविशत् । वैदिकमंत्रस्तवैर्नवग्रहपूजनं देवार्चनञ्च प्रारब्धम् । भगवतः उपेन्द्रस्य स्तवनमुदगीयत । भाग्यवती मनस्येव त्र्यम्बकेश्वराराधनतत्पराऽसीत् । यौवतं मंगल गायनमारेभे । लाजामिश्रित पुष्प-प्रक्षेपणैः सर्वे नवजाताय शुभाशिषः प्रायच्छन् । रामदासो भगवदनुकम्पां मन्यमानो विनयावनतमौलिना प्रणनाम । पण्डित स्वामिनाथेन ज्योतिषां पञ्चागानुसारेण, जन्मदिन ग्रह नक्षत्रादीन् विचारयता जातकस्य नामकरण संस्कारं संश्चकार ।

औत्सुक्येन रामदासोऽपृच्छत्—"केनाह्वयेनाऽह्वयनीयम् ?" स्मामिनाथेन सहजतयोत्तरितम्—"बिल्वमंगल नाम्ना ।" श्रुत्वैतत् सशंकितोऽभूद् रामदासः, परं भाग्यवती प्रहर्षिता । विस्मयाकुलो रामदासोऽचिन्तयत्—"कथमवगतमिदं रहस्यं स्वामिनाथेन ? किं भाग्यवत्या प्रकटीकृतम् ? भूयो भूयो वितर्कयन् स पुनरुवाच—"भवता नाम-विषये पुनर्विचारणीयम् ।"

—नामैतत् समुचितम् ।

—परं वैष्णवोऽहम् ।

—अयमपि परमभक्तो भविता ।

—"अपि नाम शैवः ?"—उद्विग्नतयाऽब्रोचत् रामदासः ।

—नहि, भवादृश एव । यथा भवान् नाम्ना रामदासः, परं कृष्णोपासकः । तथैव बालोऽयं बिल्वमंगलाभिधेयोऽपि परमानन्दं माधवमुपास्यते ।

—कीदृशी ग्रहस्थितिरस्य ?

–स्वामिनाथो मौनमालम्बते ।

–किञ्चिद् भणतु भवान् ।

–भो रामदास ! ग्रह-स्थितिर्नानुकूला ।

–सम्यक् विवेचयतु भवान् ।

–पितरौ नैवायं सुखयिष्यति ।

–अल्पायुष्यत्वात् ?

–नहि, नहि ! पूर्णायुष्ययोगः । बालो दीर्घायुर्भविष्यति, किन्तु·····

–निःसंकोचं कथयतु भवान् ।

–अयं भोगी भविता ।

–परं भवता तु कथितं यत्·····

–एतदपि सत्यम्, तदपि नानृतम् । यौवने परमविलासी, प्रौढावस्थायां च परमयोगी भविष्यति ।

–अपि मे बालो वैभवशाली भविष्यति ?—भाग्यवत्या जिज्ञासा प्रस्तुता ।

–निश्चयेन भविता ।

\+ \+ \+

अद्य दिने सर्वातिथयः भोज्यप्रसादेन समादृताः । पण्डित रामदासेन सर्वे ऋत्विजो दक्षिणादिभिः सम्पूजिताः । समागत-ब्राह्मणाः शुभाशिषः प्रदाय गतवन्तः । तदनन्तरं भाग्यवती स्वशिशोर्भालमाश्लिषन्ती जगाद—

–"शिवानुकम्पाफलं त्वम्, परमद्यापि तव तातेन भगवतोऽपमानं विहितम्, किं करणीयम् ?

–भाग्यवति ! सामाजिक-प्रतिष्ठा कथं विस्मार्या ?

–स्वामिन् ! यदा वैदेशिकाः म्लेच्छजातयः राज्यसिंहासनमधिगृह्णन्ति, तदानीं सर्वाः प्रजाः तदीयशासनं माल्यवत् स्वीकुर्वन्ति, मूकपशुतुल्याश्च प्रतिक्षणमातंकिताः मुखेभ्यो विद्रोह-स्वरलेशमपि न निःसारयन्ति ।

प्रत्युत शिवेन आवामनुकम्पितौ, सफलमनोरथौ चाद्य, तदपि तं प्रत्यश्रद्धा ?

–शिवकृपा सम्मुखेऽवनतोऽहम् । त्वत्प्रभुं नमामि बारं-बारं, किन्तु एतदर्थं परम्परित-धर्मस्य परित्यागं नैव विधास्यामि । भालेऽस्मिन् त्रिपुण्ड्ररेखाः कदापि न चकास्यन्ते ।

–अप्येतस्मान्नैव हर्षः ?—(शिशुं दर्शयति)

–भाग्यवति ! किं कथयसि ? इतोऽप्यधिका कतमा प्रसन्नता भविष्यति ।

–तर्हि, सकृत् शिवमन्दिरे चलामः ।

–असंभवमेतत् ।

–दर्शनमात्रेण धर्मस्तु नहि परिवर्तिष्यते ।

–देवि ! नैव निश्चयामि यत् शिवकृष्णयोः कीदृगन्तरम् ? कियान् विवादो द्वयोर्मध्ये । किन्तु विश्वेस्मिन् आर्यावर्ते शैव-वैष्णवौ चान्तरा कश्चन विषमाऽवरोध इव विशीर्यते । परस्परमश्रद्धया भ्रूनासाननानि तिर्यक्-क्रियन्ते । सांस्कृतिकोत्सवान्यपि विभिन्न-दिवस-समयेषु आयोज्यन्ते । यथाहि व्रतोपवासान् शैवाः प्रथमदिवसे, वैष्णवाश्च अपरेद्युरुद्घोषयन्ति । अपि चास्माकं समाजे शैवजनेन सह सामाजिक-व्यवहारोऽपि वर्ज्यः । तवानुमोदनात्तु वयं जाति-बहिष्कृताः, समुदाय-निष्कासिताश्च भविष्यामः, तदानी मपमानिताः सन्तः कथं जीवेमः ?

–"शिशुं बिल्वमंगलं भगवच्छिवचरणयोर्निवेश्य मंगलाशिषं यियाचिषुरहम्" —भावविह्वला भाग्यवती अयाचत ।

–भगवत्कृपां स्वीकुर्वः, अनुष्ठानेऽपि शिव-प्रतिमा प्रतिष्ठिता । पौनःपुन्येन श्रद्धामाविष्करोमि, नाऽलं किमेतत् ?

भाग्यवति ! शिवालयालिन्दं यावद् गमनस्याभिप्रायं जानासि ? समाज-संघर्षो भविष्यति ।

–वयमितो दूरं प्रयास्यामः ।

–किं, किं कथयसि मुग्धे ?

–अस्मत्कृते एतदधिकं सुखं किम् ? अहमाजीवनं सन्ततिसुखाय विकलाऽस्म् । सम्प्रति यदाऽनन्द क्षणानि सुलभानि, तदानीं भवतो निःसारा एते मर्यादाः सिद्धान्तानि च गल-ग्रहिलानि संजातानि ।

—प्रिये ! अहमप्यतीव हर्षितः सुतदर्शनात् । तव भगवत्कृपातः पितृ-ऋण विमुक्तोऽद्य । परमशक्ति-शिवेन पूर्वजाः नरकाद् उद्धृताः, किन्तु स्वदेशं विहाय प्रयाणं तु नोचितम् । अग्नि-परीक्षाऽपि वरम्, परं धर्मविसर्जनं न ।

—मदीयभावनामनुभवतु भवान् ।

—भावनावशाद् धर्मं विसर्जितुं नैव शक्नोमि । भावे ! मदात्मा भूयोभूयो भासयति जागद्यते यद् विष्णुकृपायाः एव फलमेतत् ।

—भवद्भगवानेव प्रासत्स्यत् चेद् अध्यावधि कथं विषण्णाः वयं ?

—आस्थां मावहेलय । भाग्यवति ! अतोऽधिकं मा दुर्बलय । त्वदीयकोमलाशयैर्विशीर्णोऽहम्, विचलितसिद्धान्ततया पथच्युतश्च । आ! हा!, किन्तु..... एवं गदन् गदमयो व्यग्रश्चाभूद् रामदासः ।

स्वपतिमस्यां विकलावस्थायां विलोक्य भाग्यवती चापि संशयाकुलाऽभूत् । स्वहृदि पाषाणमिव प्रसारयन्ती विनीतस्वरेण जगाद—स्वामिन् ! क्षम्यताम् । मया स्वार्थवशादतीव संतापितो भवान् ।

—भाग्यवति ! शक्तिस्त्वं मदीया । त्वयि पूर्णतो विश्वसिमि ।

—भविष्यति कदापि नैवाऽवरोत्स्यामि ।

—इदमेव आशासे ।

—किमपि नोत्तरितं भाग्यवत्या ! सुताननं निरीक्षमाणा भावनिमग्ना संजाता ।

पण्डित रामदासोऽपि मन्दिरं प्रतस्थे ।

ततश्च भाग्यवती धार्मिक-रूढाऽस्थासु व्यचिन्तयत् । तर्कमिमं स्वीकर्तुम् नितांतमवशा सा-यत् सुताननदर्शनं विष्णुकृपाफलम् । सकृच्छिवमन्दिराऽलिन्दे स्वसुतं स्पष्टुमना अन्तरैवाऽन्दोलिता बभूव । अन्ततो विनिश्चितं यद्-रजनीघनान्धकारे मन्दिरमेष्यति । नासीत्सा पराजिता । विजयोल्लासानुप्राणितानि आनन्दक्षणानि वृथाऽपनेतुं नाऽकांक्षते स्म । पतिवत् पुत्रमपि धर्मान्धविमूढं न विदिधित्सति स्म ।

तनयं निरीक्षमाणा सोवाच—"बिल्व ! भक्त्यां विश्वसेः, न तु मूर्तौ ।

शिशोरानने स्मितहासो बभासे ।

+ + +

3

जरयाऽक्रान्तो रामदासः। जातानीन्द्रियाणि नियन्त्रण-शून्यानि। प्रतिक्षणं भगवदाराधनव्यस्ततामाकांक्षते स्म। पुनः पुनर्वेदनेयमतुदत् यत्-बिल्वमंगलो निजरूपं परम्परितप्रतिष्ठान्वितं नाभवत्, नाचचरच्च। स्वयं सः निजात्मजं विविधशास्त्राणि अध्यापयत्। दर्शनागमस्य गहनग्रन्थिजालान् विचकयामास। किन्तु बहुधा प्रेरितेपि वैष्णवं विधातुं नाऽपारयत्। सह संचारणाय प्रत्यहं बिल्वमंगलं कृष्णातीरेऽनयत्, परं तत्तरंगैर्विनोदयन् अथवा स्नाननिरत-युवतीनां सौन्दर्यं निरीक्षमाणोऽवर्तत। ईदृगाचरण-चेष्टाभिर्व्यथितो रामदासो भृशमनुतपे। मन्दिरेऽपि देवार्चनापक्षेया भगवद्-विमुखे तदक्षिणी अंगनांऽगेषु व्यापारिते आस्ताम्। प्रवचन-कथाऽवसरेस्वपि सौन्दर्याभिभूतो व्यस्मरत् कथावाचनम्, उपहासास्पदञ्चाऽभवत्।

एकदा भागवत-दशमस्कन्धस्य कथावसरे कस्याश्चित् किशोर-कुचसौन्दर्यं वीक्ष्य विमुग्धः, कथाक्रमाद् विचलितवान्।

–पंडित रामदासोऽब्रवीत्—"कथं विरमसि ?"

–गोकुलाद् गोपी कचिदायाताऽस्ति।

–बिल्वमंगल ! निरवकाशो विस्तरतु कथाक्रमम्।

–तथापि स्तब्धोऽवर्तत सः। समुदाये शंकाज्वारः समुच्छलितः। चर्चा विजृम्भिता। किन्तु किशोरीदर्शने तथैव व्यापृतवान् बिल्वः। अथ लज्जितानना बहिर्निर्गता सा किशोरी। तस्याः प्रयाणादुद्विग्नो यथाकथं पुनः कथामगदत्, किन्तु श्रोता तु नासीत् तत्र। रामदासोऽपि व्यथितमनसाऽगच्छत्। अथ च बिल्वमंगलः किशोरीमन्वेषयन् मंदिराद् बहिरागतः, बहिरपि तामनवाप्य निराशो गृहं प्रायात्। आस्तां पितरौ गृहे व्यथितौ। कश्चिदपि तदभिमुखं नापश्यत्।

पितुश्चरणौ स्पृशन् बिल्वमंगलोऽवदत्—

–"तात ! क्षम्यताम्, भविष्यति जातु तादृगपराधो नैव भविष्यति।"

–पूर्वज-प्रतिष्ठा क्षणेनैव क्षीणा।

–सदोषोऽहम्।

—कुलकलंकस्त्वम्; बिल्व ! नाहमीहे सुखमीदृक् । विंशतिवर्षैरेकैव साधनाऽजीत् मदीया यत्—त्वत्प्रकाण्डपाण्डित्येन वैदुष्यपताका आर्यावर्ताकाशे प्रोद्धूयताम् । त्वद्-विजयदुन्दुभिघोषैः पूर्वजानामपि गौरवं वर्धताम्, मदीय-जनकत्वं च सफलीभूयात्; परन्तु सर्वं विलुप्तम्, शब्दशून्या निराश्रिता कल्पनेव सर्वं वृथा । अभिशप्तं मे पितृत्वम् । न जाने, केषां पापानां फलमिदमट्टहासायते । बिल्व ! निजपाणिपाशेन मद्गल-ग्रहणं विधाय स्वच्छं विचर ।

—"तात ! मर्षय";—कातर-स्वरेण बिल्वमंगलो ययाचे ।

—वत्स ! बिल्व ! यौवन-सोपानेषु प्रथमावतरणे एव व्यभिचरितं त्वया । परम्परितसंस्कार-सिंचिते पारिवारिकच्छायाकदम्बेऽपि त्वयि कटुताऽप्लाविता ? यावान् सुन्दरः शिक्षितस्त्वं तावानेव पतिताचरणः । पिता स्वात्मजे निज-प्रतिबिम्बं दिदृक्षति, सुतोन्नतिमिषेण यशो विन्दति; किन्तु हा ! मन्दभागोऽहम् । सर्वमेव विपरीतम् । कुतो यशः?, कथं सुखम् ?.....

—"अपसर ममाक्षिभ्याम्"—एवं गदन्नधीरोऽभूद् रामदासः ।

अतः परं बिल्वः स्थातुं नाऽशकनोत् । गृहाद् बहिरागतः । भाग्यवती सोच्छ्वासं जगाद—

—"क्षम्यताम् बिल्वम् ।"

—वरं चेद् आजीवनं वन्ध्याऽवतिष्यः । कुपुत्राद् अपुत्रत्वं श्रेयस्करम् ।

—भविष्यति कदाऽप्यपराधं नैव विधास्यति बिल्वः ।

—भाग्यवति ! चरित्रमेकं निर्मलवस्त्रम् । तस्मिन् कदाचिल्लग्नं कलङ्कम् नापसारयिष्यते । स्वभावसमाविष्टा विकृतिरपरिहार्या ।

—"गृहाद् विनिर्गतः सः, यदि किंचित्".....

अतः परं सा कथयितुं न पारयामास ।

—आत्महत्यां विधास्यति ? ईदृक्-कुपुत्रस्य मरणम् उत्सव-समानम् । सा जननी भाग्यशालिनी, यस्याः कुपुत्रं प्राण-विसर्जनात् कुलापकीर्तिं रक्षति । नावगच्छसि यत्—त्वदन्तः ममता विनयना । पुत्रमुखदर्शनमात्रा त्वदीया लालसा । अहं तावत् पिता; तनयान्तर्बाह्यव्यक्तित्वं शाणोल्लेखनाय विकलयामि । मरति चेद्-वरम् ।

—"एवं मा ब्रूयात्"—रुदनपुरःसरा वृद्धाऽवदत् ।

—समाजो निन्दति, जातिर्बहिष्करोति, कुलं कलंकितम्, पितरौ सतद्-अश्रु-पूरितौ, स्वयं चावमानितः। तस्याः सन्ततेर्जीवनात् किं प्रयोजनम्? भाररूपमेव जीवनं चेत् प्रस्तरमूर्तिरेव शिरसि सह्या, किं तेन सजीवेन। अद्य तेन मत्प्रतिष्ठा धूलिध्वंसिता कदापि न क्षमाम्यहम्।

—स्वामिन्! निवेदनमेकम्।

—सदैव पराजये त्वत्तः।

—बिल्व-विवाहः करणीयः।

—भाग्यवति! क्वेदानीयं वयः? क्वच विवाह-प्रसंगः? विवाह-विधानात्सः जीवने किमपि कर्तुम् न पारयिष्यति। विषय-विलासे निमंक्ष्यति, बहिर्गमनमपि नेष्यति।

—अपयशस्तु न भविता।

—अस्तु, कस्यचित् कुलीन-परिवारस्य प्रस्तावं प्रतीक्षावहे।

—यथाकथं विश्वसिता भाग्यवती। परं रामदासो व्यथामपनेतुमवशो भगवत्-प्रतिमाग्रे गद्गद्-गलेन गदितुमारेभे।

—"प्रभो! आजीवनमुपासम्, त्वत्साधनापथात् न व्यचलम्, परीक्षा-क्षणेष्वपि धैर्याद् अस्खलितोऽहम् जिज्ञासामि यत्-कतरत् पापफलमिदम्? कतमापराधाय मां दण्डयसि? कथं वैष्णवोऽहं पुत्रस्य दुराचरणं सहिष्ये? देव! शरण प्रयच्छ।"

भाग्यवती विचलिताऽभवत्। पत्युः करुणाक्रन्दनमसोढुक्षमा बिल्वाऽन्वेषणाय गृहात्प्रचलिता। मार्गणतत्परा सा नदीतीरमुपागता! बिल्वस्तत्र तरलजलतरंगैर्हृदयोत्तालतरंगान् संतुलयन् स्वात्मनि निमग्नः आसीत्। अन्तर्ज्वार-समाक्रान्तः स समीपवातावरणमजानन् शून्येक्षणोऽवर्तत। भाग्यवती समीपमुपविश्य साश्रुनयना चिरं स्थितवती। अश्रु मिश्रिताश्वासैः सहसा विस्मित्य बिल्वमंगलो रूदतीं मातरं पश्यन्नवोचत्—

—"अम्बे! त्वमत्र?"

—वत्स! माताऽहम्! पिता सम्भवेन्निष्ठुरः, परं ममता स्नेहान्धा भवति। सुतावगुणान् नावगणयति सा। वात्सल्यवेगोऽहर्निशं पराजयते ताम्। विश्वेऽस्मिन् काचिदपि स्वात्मजं कुपुत्रं न कथयति। प्रत्यहं तवाचरणदोषान् शृणोमि, परं त्वां दुराचारिणं न मन्ये। किन्तु त्वत्पितुः स्थितिं सोढुमक्षमा।

–मातः ! मया किमपि नापराद्धम् ।

–बिल्व ! मन्ये, अनघस्त्वं, परन्तु निजकुलीनता, परम्परितमर्यादा, प्रतिष्ठा च स्कन्धे धुरीया । ताभ्योऽपसरणं नोचितम् । पितुः प्रतिष्ठा संरक्षणीया त्वया ।

–मया केवलं सौन्दर्यमेव निरीक्षितम ।

–संयम आचरणीयः ।

–संयमितोऽहम्; परं सौन्दर्यं तु सृष्टेश्चमत्कारः । सौन्दर्ये परमशक्तिविलासः । प्रकृत्याः प्रत्यंगेषु सौन्दर्यसरोवरं विलसति । तद्दर्शनात् मनसि असीमानन्दानुभूतिर्भवति ।

–शीघ्रम् कयाचित् सुन्दर्या सह परिणयं रचिष्यामि ।

–मातः ! अन्यथा विचारयसि । नहि करिष्यामि विवाहम् । विवाहो नैव सौन्दर्य-दर्शन-पराकाष्ठा ।

–तात ! त्वत् पितुः पीडां द्रष्टुमक्षमाऽहं जरठा । यद्येवमेवाचरिष्यसि चेत् सन्तापमसहमानौ नावां जीविष्यावः ।

–मा मैवं ब्रूहि ।

–बिल्व! तनुजं प्राप्य निजां धन्यां मन्यते ननु माता । परं पिता पुत्र-प्रतिष्ठातो यशोऽश्नुते । सुतयशसा वार्द्धक्यमपि यौवनायते । किन्तु तव पिता तवाचरण-व्यथितः श्रान्तश्चाऽभवत् ।

–मातः ! अतः परं न तापयिष्यामि तदन्तः ।

–बिल्व ! एवमेव आशासे । एहि, गृहं प्रयावः ।

–अम्बे ! प्रयाहि तावत्, सम्प्रति एकान्तमभिलषामि, नदीपुलिनम्, तरंग नर्तनम्, बुदबुद-विलोपनम्, मत्स्यविवर्तनम्, विहगकलरवकीर्तनञ्चेति मामाकर्षयन्तितराम् । चेतः प्रेरयति यद् आजीवनं प्रकृतिरमणीयाङ्के समयं यापयन् जीवानि ।

–चेदस्मद्-भविष्यम् ?

–तवान्तः करूणा-निर्झरिणी, यस्या अमृतमयधारायाअवगाहनात् पुनामि सततम् । अम्बे ! त्वत्तः कदापि दूरं न वर्तिष्ये । भाग्यवती बिल्वशिरो हस्तयन्ती जगाद—"वत्स ! सत्वरमायाहि. एकाकी तव पिता ।

–मा मयि चिन्तय ।

मातुर्गमनानन्तरं बिल्वमंगलो जलधारावक्षसि संतरन्तीस्तरणीपंक्तीन् विलोकयितुमारेभे । नाविकाः दण्डफलकै र्जलमालोडयन्तो सुदूरमार्गात् प्रत्यावर्तन्त । केचित्प्रयाणपरायणाः अन्ये चागमनशीलाः आसन् । कृष्णाजलं कलकल–छलछलायितं संगीतं प्रश्रयत् प्रवहति स्म । केचित् संभ्रान्ताः सम्पन्नाश्च जनाः संध्यासिन्दूर दुकूलावृतायाः कृष्णायाः रोधसि मनो विनोदयन्तः आसन् । क्वचन युवतयो मृदुलाञ्चलैर्दीपज्योत्स्नां सुरक्षन्त्यः स्वान्तःसंदेशसहितं दीपविसर्जनाय समुद्यताः आसन् । सहसैव धाराप्रवाहे असंख्यदीपमाला चकासते । कानिचिद् दीपानि वीचि-सहचराणि भवन्ति, अन्यानि तरंगसंघर्षे पराजितानि, अपराणि तीरव्यामोहमपि न त्यजन्ति । विलोकितं बिल्वेन यदेकं दीपं उर्मिविरोधं सहमानः पारयितुं प्रयतते ।

घनान्धकारो विस्तृतः । व्याप्ता तटे शून्यता । द्वित्रनाविकादतिरिक्तं निर्जन-नीरवता किल समाहिता । तदैव कर्णेऽवतरत् स्वरमाधुर्यं झंकृतम्—

"अप्येकाकी पथिक ?"

विवर्तकन्धरं बिल्वोऽपश्यत्—"एकां युवतिं सतृष्णेक्षणेन प्रश्नावृत्तिमिव प्रस्तुवन्तीम् ।"

–सहचरिष्यसि ?

–क्व ?

–पारे जलम् ।

–पारे किमस्ति ?

"अहम्"—सस्मितमंगवक्रतां प्रदर्शयति स्म सा ।

–इहाऽप्यसि ।

–"अबुधोऽधुना त्वम्"—कथयन्त्या तयाऽधरदंशनं विहितम् ।

परितो विलोकितं बिल्वेन । निविडान्धकारे क्षीणप्रकाशकिरणाः मन्दिर शिखरे एवासन् ।

–बिल्वमौनमसहमानेन वामाचरणेन नूपुर-रणितं झङ्कृतम् । क्षणं यावत्तीर-प्रान्तं ध्वनितम् ।

–अपि नृत्यसि ?

–संसारमेव नरीनर्ति ।

—कुत्र वससि ?

—जनपदाद् दूरम् ।

—इयद्-दूरम् ।

—मच्चरणविन्यासाः मन्दिर-प्राङ्गण-प्रासादेषु थिरकयन्ति । उत्सवादिषु मत्कलाऽभिनन्द्यते । मत्कटाक्षानि युवकहृदयान्युद्वेलयन्ति, तथापि सर्वे मत्तो जुगुप्सन्ते ।

—अद्वितीया वससि ?

—नहि, संगीत-लय-नूपुर-स्वराणि मम परिजनाः ।

—सरिद्वीचिषु विश्वससिषि ?

—एताः मदीयश्वासाः ।

क्षणं यावत्तदीयसाधनासंकल्पमभिपश्यन् विमोहितो बिल्वः । सुन्दरी प्रतस्थे ।

—सुभगे ! यासि किम् ?

—"पारे-जलं गमनीयम्"—गदन्ती सा तरणीमधिरुढा । बिल्वो व्यलोकयत्—तारक-दीपितरजन्यां मध्ये-धारां तरणी शनैरग्रसरिता । मधुरामन्त्रणस्वरलहरीं प्रशान्तवातावरणे विकीर्य सा विनिर्गता ।

नूतन साध्य-संकल्पितो बिल्वमंगलस्तीराद् गृहं प्रायात् ।

\+ \+ \+

४

समस्तजनपदे बिल्वमंगलस्यापयशः प्रासरत् । जनसाधारणस्तं संकेतयन् आलपत् । रथ्या-प्रयाते तस्मिन् गृह-द्वाराणि पिहितानि क्रियन्ते स्म । युवत्यो द्रुतं प्रपलाटय गेहान्तर्विशन्ति स्म । मन्दिरे प्रवेशाय प्रतिबन्धितो बिल्वः । सन्ध्यावेलायां दीपविसर्जनाय ललना काचिद् एकाकिनी नदीतटं गन्तुं नोत्सहंते स्म । पंडित रामदासस्य प्रतिष्ठां भगवद्-भक्तिञ्च विचार्य स जनपदान्नैव निष्कासितः केवलम् । तदाचरण

व्यथितौ पितरौ रुग्ण-शय्याश्रितौ अभूताम् । बिल्वो बिलम्बेन रात्रौ प्रत्यागत्य स्वकक्षे अशेत । निजशोधनसंयमाय सो यथासम्भवं प्रायतत, संकल्पावृत्तिं प्रस्तौति स्म, परं न कोऽपि श्रद्दधे । प्रतिनयनं सशंकितं चाघूर्णयत् । एतस्मादुत्ते-जितवान् बिल्वोऽनवरतम् । अन्ते निराशः कृष्णातीरे बलादात्मानमाश्वासयत् ।

सर्वथा नैराश्यमाप्तवान् रामदासः! अनेकस्थानेभ्यो विवाहप्रस्तावः स्तिरस्कृतः । गृहाद्बहिः प्रयातुमपि नोत्सहते स्म रामदासः । बारंबारमीश्वरादयाचत प्राणान्तम् । रूग्णकायभारमसहमानो विदारितोऽन्तर्मनसि ।

एकदा नक्तम् धर्मपत्नीं संबोधितवान्—"भाग्यवति ! विनष्टं कुलम् । कियान् अहं पापी ?

—स्वामिन् ! सर्वथा मदीय दोषः । ममतान्धबुभुक्षया संतापाग्नौ दग्धावावाम् ।

—नहि, भाग्यवति ! न त्वद्दोषः ।

—भवान् बहुधा मया संतापितः ।

—विचित्रस्वरूपः संसार । अन्धदर्पणं मोहः । यस्मिन् कोपि निजस्वरूपं न परिचिनोति । एतानि पापानि पूर्वजन्मीयानि, तेषां प्रायश्चित्तं तु करणीयमेव ।

—भाग्यवती भृशं रूरोद ।

—अधीरा त्वम् । एवमात्मनि प्रतपनात् समाधानमसंभवम् । स्वामिनाथस्य भविष्यद्वाणीं विचारय, समाश्वसिहि, भाविनं परावर्तितुं कः शक्नोति ?

—कथं नावबोधति बिल्वो निजम् ?

—बोधनमशक्यम् । स्वयमपि पश्चात्तपति, किन्तु प्रकृत्यां यथासमयमेव संशोधनं संभवति । भाग्यवति ! ममान्तः सन्निकटम् ।

—मामेकाकिनीं वियोक्ष्यते ?

—संसारे कोऽपि नैकाकी । धर्मकर्माणि प्राणि-सहचराणि ।

—स्वामिन् ! मामपि सहचरीं करोतु ।

—भाग्यवति ! यात्रेयमद्वितीया । पश्य, पूर्वस्यां प्रसरति प्रकाशः । अरूणिमा विकीर्णः । केचिद् कमलपाणयः दिव्यशरीराः इत एवायान्ति ! भावे ! कष्टं मानु-भव । नश्वरशरीराय मा शुच ।

—स्वामिन् ! क्षम्यताम्-इति विलपन्ती पतिचरणयोः पतिता । पण्डित रामदास्य विग्रहे अपूर्वतेजो विकीर्णम् । मुखान् मन्द्र-स्वराणि प्रस्फुटितानि—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रासादान्मयाऽच्युत !
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ।।

शनैः शनैः स्वरं क्षीणतरमभूत्, अधरश्च निश्चलः । भाग्यवती यथाकथंचिद् धैर्यमवलम्ब्य नाक्रन्दितवती । तया पतिमुखं पंचामृतेन पूरितम्, यमुनाजलस्नापितं निर्जीवशरीरं च गोमयवेष्टितधरातले संनिवेशितम् ।

शोकसमाचारोऽयं सकलग्रामपरिसरे प्रासरत्, परं बिल्वमंगलस्य स्थिति-सूचना एव नासीत् । सर्वत्र तस्यान्वेषणेऽपि असाफल्यात् कुल-परिजनवृद्धाः साक्रोशं प्रतीक्षन्ते स्म । पुत्रे सति पितुः शवप्रयाणाय बिल्वमंगलप्रतीक्षा अनिवार्यासीत् । गृहाद् बहिर्निषण्णाः वृद्धपरिजनाः साक्रोशमालपन् । वयोवृद्धेन केनचिदुक्तम्—"भक्तगृहे राक्षसोऽयं प्रसूतः ।"

अन्योऽब्रवीत्—सात्त्विकजीवनं यापितं रामदासेन, तदाचरणेन न कोऽपि संतापितः, परमीदृशसाधोर्गृहे एतत् कलंकम् ?

तदैव केनचित् सूचितम्—"आगच्छति बिल्वः" ।

—क्व खलु प्राप्तः ?

—वेश्यागृहे ।

—धिग्, धिग् ! ईदृशपापिनो हस्तस्पर्शोऽपि नोचितः ।

—कथमेतत् संभवम् ?

कुपुत्रात् मोक्षोऽसंभवः ।

—लोकाचार-विरुद्धम् नाचरणीयम् ।

—ईदृशकलुषितं ग्रामात् निष्कास्यताम् ।

—ग्रामप्रतिष्ठां कलंकयति बिल्वोऽयम ।

एवं प्रचलितचर्चालापे जनसमुदायेऽभ्यागच्छन् बिल्वो दृष्टिपथि पतितः । प्रत्येक्षणैर्जुगुप्सा प्रदर्शिता, परं वाणी नियमिता सर्वैर्ननु तत्स्पर्शदूषणभयात् ! अकिंचित्-प्रतिक्रियः सालसनेत्रः स गृहान्तर्गतः । शवचरणस्पर्शावसरे भाग्यवती प्रोवाच—"बिल्व ! पिता त्वां कदापि नैव क्षमिस्यते । पितुरन्तसमयेऽपि नावकाशस्त्वयि ।

–मातः !

–तूष्णींभव । भविष्यति मा कथयतु मां मातरम् । बिल्व ! त्वयाऽत्मसंबन्धाः अपि अवहेलिताः । यस्य कृते प्रसूतस्त्वं तदेवोपेक्षितम् । त्वज्जन्म भाररूपम्, निरर्थकं जीवसि ।

–प्रस्तर-स्तम्भवद् अचलोऽभवद् बिल्वः ।

–यदि साम्प्रतमपि सत्संकल्पेन जीवितुमाचेष्टसे, तर्हि प्रतिष्ठाप्राप्तिः संभवा ।

–किमपि नोत्तरितं बिल्वेन । परिजनास्तमपसार्य शवस्यान्तिम-संस्कारसंपादनाय व्यचेष्टन्त । विधिवद् वैदिकरीत्याऽन्तिमसंस्कारं संपाद्य बिल्वमंगलेन सर्वे समाश्वसिताः यत्पैतृक-परम्परयैव जीवनं यापयिष्यामि । श्मसाननिवृत्तेरनन्तरं गृहान्न निर्गतः । स्वकर्म समीक्षमाणः सः भूयोभूय आत्मानमबोधयत्, किन्तु मनस्तु सर्वथा प्रतिरोद्धुमवर्तत ।

मनोमान्यता ध्वनितवती यत् – भोग एव जीवनानन्दः, लोकतृप्तिश्च । अदृश्याराधनं नीरसं कल्पनामात्रम्, प्रत्युत सौन्दर्यं प्रत्यक्षपीयूषस्रोतः । योगे भोगः समाहितः । योगं बिना भोगोऽपूर्णः ।

–भाग्यवती शिरो हस्तयन्त्युवाच—वत्स ! मा धर अधीरताम् । अधुनापि समयः । पैतृकयशः सुस्थापय, तस्मादेव तदात्मा सुखमेष्यति ।

–मातः ! नापराद्धम् मया ।

–वेश्यागृहे सततं वासो नापराधः ?

–अम्बे ! वेश्यापि मानवी । सन्ति तस्यामपि ते सर्वे गुणाः, ये नारी-सहजाः भवन्ति । ताः सौन्दर्य-प्रतिमाः । सौन्दर्योपासना च नैव पापजननी ।

–मातरं शिक्षयसि ?

–कोपि नावगच्छति माम् ।

–मूर्ख ! प्रतिष्ठां विलोप्य जीवितुं न पारयिष्यसि । अधमः सः, यः पैतृक सम्पदि विलसति, पैतृकयशसा जीवति त्वं तु स्तरादितोऽपि पतितः । त्वादृशकुपुत्राय उपालम्भशब्दा अपि समाप्ताः ।

—ओ मातः ! प्रस्तर-प्रतिमासु नैव विश्वसिमि । मयापि विधिवद् अधीतानि-शास्त्राणि; कुत्रापि न दृष्टमीश्वरम्, केवलं भावनाक्रीडनम् । अहमास्थावान् सजीव मूर्तिषु, पुनरपि त्वत्प्रसादाय प्रयतिष्ये विचारपरिवर्तनाय ।

—बिल्व ! मदीयप्राणास्त्वम् । ममतान्धभावनयाऽहर्निशं त्वत्प्राप्तये संघ-र्षितम् । विश्वासं जनय मयि यत् नाचरिष्यसि भविष्यति किंचिदेवम्, यस्मात् जुगुप्सेतां समाजः ।

—मातः ! पालयिष्यामि तवाज्ञाम् ।

—वत्स ! तमसा मा सन्धेहि । प्रकाशसहचरः समुत्सर । यौवनं त्वामामन्त्र-यति प्रभां कांचिद् विकीरितुं जीवने । दीगन्तकीर्तिं विस्तर ।

—अतिष्ठज्जड़वद् बिल्वः ।

तात ! त्वज्जनकेन नैराण्यपूर्णं प्राणाः विसर्जिताः, परलोके यदाऽहं तत्-संगिनी स्याम्, तर्हि त्वदर्थमाश्वसयितुक्षमां मां संबलय ।

—प्रत्ययं कुरु मातः !

—निजपितुश्चिताभस्म करे गृहीत्वा शपथमुच्चर—"यत् पारे-नदीं कदापि न गमिष्यामि" ।

—स्वात्मानं संबोधयिष्यामि ।

—वत्स ! साम्प्रतमपि त्वदन्ते कालिमा । कलुषमिदं प्रक्षालयं, यस्मात् तव जननी सगर्वा शिर उन्नयेत् द्वारे ।

—सत्यं वदामि । अतः परं मदाचरणैस्त्वां न संतापयिष्यामि ।

—"शिवानुकम्पेयम्"—एवं गदन्ती वृद्धा साश्रुनयना बिल्वशिरः स्पृष्टवती ।

\+ \+ \+

भाग्यवती स्वकीय-दुर्भाग्यमाक्रोशती कातरा बभूव । बिल्वमंगलः स्वात्मानं धिक्कारयन् सामाजिकरूढीन् आलोचितवान् । जातु निजं बोधयन्, कदा तु निर्दोषं मन्यमानो भृशमन्तर्द्वन्द्वेन विलोडितोऽभूत् ।

घनान्धकारः प्रसारत् । मन्दिरात् तुमुलघण्टानादो भेरीगर्जना च समुत्थिता । शून्यतायां नूपुरणितं क्वणितम् । परितोऽपश्यद् बिल्वः, परं नीरवनिर्जनप्रदेशे कामपि छायां नैवाऽपत् । तीव्रा स्वरभंकृतिर्भूयसा मनसि आन्दोलिता । विचलित-मना गृहालिन्दं लघंयितुं प्राचलत् । शपथ-प्रतिज्ञे विहितावरोधे नापारयतां वर्जितुम् । प्रबलप्रभञ्जनतुल्यः सः सरित्तीरमगच्छत् ।

–नाविकः परिचयन्नुवाच—"नैवाऽद्य ।"

–कथम् ?

–मृत्यु-दिवसः पितुस्ते ।

–जीवितुमीहे ।

–निवर्तस्व गृहम् ।

–प्रचुरपारिश्रमिकं लप्स्यसे ।

–बिल्व ! निवर्तय पादान् । शोकदिवसेऽपि रागोत्सवाय उत्सहसे ?

–शोकः ?, अतीतं प्रति शोकः ?, नहि, नहि, शोकेऽस्मिन् जड़ीभवितं न शक्नोमि । नाविक ! त्वरय, मधुरसंगीतस्य स्वरतरंगेषु निमज्जितुमिच्छामि । तत्रैव शान्तिं प्राप्स्यामि । जीजिविषा शोकशृङ्खलां भनक्ति ।

–ततो निवर्तितः कोऽपि न सुखी ।

–त्वं न जानासि । त्वया तु इतस्ततो जलं विलोडितम् । पारे-जलं त्वत्कल्पना-तीतम् ।

–सत्यम्, निर्धनाः वयं तत्रत्यसंसारं कथं जानीमः किन्तु जानामीयान् यत्—मदीयजर्जरनावि त्वादृशाः बहवः समारूढाः । इतस्तु सोत्साहं सहर्षं प्रयान्ति, उतश्चो-दासीनाः श्रान्ताः इव निवर्तन्ते । समर्पितजीवनास्ते करे वहन्तो मृत्युं विरक्तिं मनुसरन्ति ।

–सत्वरय, प्रतीक्षते सा माम् ।

–"न कोऽपि प्रतीक्षते कस्मै । केवलं स्वार्थो व्याकुलयति" कथयन्नेवं तरणी-रज्जुं शिथिलयति । वीचि-विचलिता प्रसरति नौकाऽग्रे । चप्पूदण्डफलकेन जलम् वलयन् नाविकोऽब्रवीत्—"व्यतीताः शतं समाः, परमस्माकं कराः नैव सफलिताः, अद्यापि धारा तथैव प्रवहति ।

बिल्व ! न तव दोषः ।"

बिल्वः पारे-जलं क्षीण-प्रकाशे कस्याश्चित् प्रतिबिम्बमन्वेषणतत्परः आसीत् ।

उद्विग्ननाविकः कदाचित् पारे नदीं पश्यति, जातु जलधाराम् ।

बिल्वाचरणं नैवालोचत तस्मै । मनस्येव तदाचरणमालोचितवान् । तदानीमेव नाविकश्रवणपुटे ध्वनिः पतितः—

—अपि जानासि ? क्व प्रयाति जलधारा ?

—सागरे !

—परमसत्येन परिचितोऽपि मन्मानसं नावगच्छसि ?

—अद्य तु विरमणीयम् त्वया ।

—धारा विरमति ?

—नहि ।

—तर्हि, निश्चीयताम्, शान्तिरपि अस्थिरा । धारापेक्षया मनोगतिस्तीव्रा । जानामि यत् समाजस्तिरस्करोति माम्, सदावमानना विकिरति, किन्तु असत्यप्रदर्शनाय मनस्तुष्टि-विसर्जनं नोचितम् ।

—समाजे एव निवसितुं बाध्याः सर्वे ।

—संधि-समन्वयेन ?

—वयमेव रचामो नियमान् ।

—वयमेव भवामो विशीर्णपूरःसराः यथावश्यकम् ।

बिल्व ! तव वार्तां नावगच्छामि ।

—अस्तु; ज्ञापय, जातु विहितं प्रेम कया सह ?

—नहि ।

—तर्हि किमपि ज्ञातुमक्षमस्त्वम् ।

—मयानुभूतम् यत्-धारया रोधसी सम्मिलतः, कदाचित् धारा वियुज्यते, रोधसी तत्रैव तिष्ठतः, जातुचित् पुलिनमुल्लंघते धारा ।

—अन्यत् किंचित् ?

—जलबुद्बुदानि ।

—कीदृशान्यनुभवसि ?

—यथा तव मनस्युत्थितानि ।

—मदन्तर्नैव बुद्बुदानि । अत्र धारावेगः । (हृदयं स्पृशन्) उपागच्छ, कर्णं देहि, संगीतं प्रसूयतेऽत्र । वस्तुतस्तु नेच्छामि इहसमाजे वसितुम् ।

—बिल्व ! निर्वतस्व । लालसान्धो मा भव ।

—पश्य, सापि मां प्रतीक्षते"—कथयन्नवतरत् तरणीतः ।

नाविकाधरौ मन्दं बुद्बुदायितौ—"मूर्खः" ।

\+ \+ \+

५

चिरं प्रतीक्ष्य श्रान्ता भाग्यवती, किन्तु न निर्वृत्तो बिल्वः । तातमरणशोकोऽपि यं विचालयितुं नाऽशक्नोत्, कस्तं बोधयेत् ? समस्तनक्तम् असहायाऽश्रूणि स्रावयन्ती नितान्तं व्यथिता । ईषत्पूर्वमुषावेलातः—श्रुतं तया किंचिदाहतध्वननम् । तदनु विलोकितम् बिल्वसंचरणं कक्षसमक्षे । किमपि नावोचद् भाग्यवती । मूकां विलोक्य मातरं बिल्वान्तर्मनः आन्दोलितं, ततश्चाऽपृच्छत्—"मातः ! इत्थं संवेदनया न कोऽपि निवर्तते ।"

—इदमेव पश्यामि ।

—जन्म-मरण चक्रं शाश्वतम् । हेलया तस्य भंजनमसंभवम् ।

—प्रकृति-परिवर्तनमशक्यम् ।

—पुनः कथं शोकनिमग्ना ?

—प्राङ्गणे नर्तनीयम् ? ईषदावेशेन भणितं तया ।

—इदं तु न कथयामि ।

–तव कथनस्य सरलार्थ एवाऽयं यत्-तातमरणोत्सवो योजनीयः, अस्मिन्नवसरे रूदनापेक्षया अट्टहसितव्यम्, गीतापठनस्थाने शृंगार-गीतानि गेयानि। मूर्ख ! एतदपि विस्मृतं त्वया यत् –"पितुश्चिता नाभवत् शीतला", धावितं च पारे-जलम्। तवाचरणं पशुसंस्कृतितलेऽपि नास्ति, पशुताऽपि त्वत्तो लज्जिता।

–त्वया सह तमसि कुंठितः स्यामत्र?

–नैवम् !!! त्वया तु सरित्तीरे कौमुदीमहोत्सवः संयोजनीयः। वसन्तगीतैं विलसनीयम्। विस्मृता त्वया देशसंस्कृतिः, अवहेलितानि समाजमूल्यानि, विशीर्णा च कुलमर्यादा। धर्मकर्ममूलाच्च पतितं त्वां विना वन्ध्या एव वराऽसम्। अद्यावधि त्वयि मे पक्षपातोऽभत् यदेकदा सन्मार्गमनुसरिष्यसि। एतदर्थमनेकधा पतिना संघर्षिताऽहम्। किन्तु सदाऽभिसंधिता त्वया ममता। स्वार्थतुष्टये विहितो विश्वासघातः। मद्भावनां निहत्य प्रतिपलमवमानिता माता। त्वत्प्राप्तये पतिसिद्धान्ता अवगणिताः। परमद्य ईदृशविपाकोऽभवत् यत्त्वां पुत्रकथनेऽपि लज्जते वाणी। अट्टहासाय त्वम्, कुंठायैं चाहम्। बिल्व ! गृह कुड्य-वेष्टिताऽत्रैव कुंठिता मरिष्यामि कतिपयदिनेषु। अत्यधिकं सोढुमक्षमा।

–मातः ! मैवं ब्रूहि।

–तूष्णींभव ! मातृसंबोधनाधिकारेण वियुक्तस्त्वम्। एकदिनं यावत् प्रतिज्ञा स्थिरो नाऽभूः ? मयि जीवत्यां गुण्ठितमास्थागलम्, मृतयां तु विलासभूमिरेव रचयिष्यते त्वया गृहम्।

–मूकोऽतिष्ठद् बिल्वः।

–त्वत्तो नासीद् आशा एषा। चेत् त्वज्जन्म एव नाभविष्यत्, तदेव श्रेयस्करम भविष्यत्। प्रसूत एव गतासुरभविष्यस्तदा नाभविष्यद् इयती पीडा, किन्तु साम्प्रत मसंख्यपुत्रमरणादपि कष्टतरा स्थितिः।

–अपीच्छसि मम मरणम् ?

–संसारे कापि माता त्वादृशकुपुत्रं न सहिष्यते। ईदृशभारात् निस्सन्ततिरूचिता।

–मनसा कथयसि ?

–बिल्व ! मातरं परीक्षसेऽद्य ?

–नैवम् !!! स्वयं परीक्षण-प्रभञ्जनग्रसितोऽहम्।

–स्वनिश्चयं नैव परिवर्तिष्यसे ?

–यथाऽहं जीवामि, तदेव सत्यम् । त्वच्चरणयोः शपे, ऋतं ऋते न किंचिज्जीवामि । समस्तवेदागमान्यपि सत्यमेव समर्थयन्ति । पिताऽप्यासीत् सत्यपक्षपाती । विश्वमिदं द्विरावृत्तं जीवति । कोऽयमीदृशः ? यो भोगं विना गृहस्थः । भोगस्तु भगवत्प्रियः ।

–बिल्व ! न त्वं केवलं पतितः, अपितु वाचालश्चापि ।

–यत्सत्यं मया स्वीकृतं, न तत् तिरष्कृतम् विसर्जितं च, पुनरपि कथयसि पतितं चेत्काऽपत्तिः ? सन्तति यत्किंचित्संबोधनाय माताऽधिकारिणी ।

–नाधिकं जीविष्यामि ।

–सत्यं नैव तिरोहितम् । मरणं सत्यम्, शाश्वतञ्च । यथासमयं स्वागताय स्वमुपयाति मृत्युः ।

–त्वमपि मातृमरणं प्रतीक्षसे, किन्तु न जानामि तदागमनघटिकाम् ।

–त्वया तावदनुभूता ।

–एवमवमानिताऽपि काभिलषति जीवितुम्, परं यथासमयं भवति मरणम् । काश्चित् मादृशाः श्वसिता अपि मृत्युक्षणानि जीवन्ति । तदानीमेव मृतवतीवाऽहं, यदा तव निन्दां श्रुतवती । बिल्व ! मृत्युरेवाऽपकीर्तिः ।

–अपकीर्तिः ? स्वार्थान्धाः द्विषाः निन्देयुः, सा एवापकीर्तिः । यदा स्वार्थलोलुपास्ते एव प्रशंसेयुः –सा एव सुकीर्तिः ? नाहं कंचित् संतापयामि । न केनचिदभद्रं व्यहरामि, कस्मादपि न याचे भिक्षाम्, न धनं मुष्णामि, पुनरपि निन्देत्समाजस्तर्हि निन्देत् ? समाजस्य कल्पितभावनाभिराशकितोऽहं स्वाभिलाषहत्यां न विधास्यामि ।

–यत्किंचिदाचरसि, पापंतत् नैव पुण्यम् ।

–समाजोऽयं पुण्यपरिवेशे पापायितो जीवति । नैतत्कोपि दुर्भणति ? भागवतकथा-श्रवणावसरे गोपिकासौन्दर्यरसपानं किं न पापम् ? रासलीलयाः मादकदृश्याणि किं न पापभाजनानि ? भगवन्मन्दिरे देवदासीनां वासना-ञ्चितनृत्यानि न पापदर्शनानि? गोस्वामिनः प्रासादे सुन्दरीणां विलासनर्तनं भगवद्भक्तिः कथ्यते, किन्तु बिल्वस्य वेश्यावेश्य- गमनं पापम् । आ ! हा ! किं कथनम् ?

–"आम् !!! पापम् ।" साक्रोशमाक्रन्दिता वृद्धा ।

–अतः परं पापीति संबोधय ।

–किमहं भणिष्यामि ? त्वमेव कदाचित् पश्चात्तप्ष्यसि । त्वदन्तर्मनः

चीत्कारपुरःसरं गर्जयिष्यति–"पापीति"। अपसर, त्वया सह संभाषणेऽपि ग्लानिर्जायते।

–ततोऽपि त्वत्पुत्रं कथयिष्यतेऽयम्।

–इयमेव पीडा दहति।

–विवशोऽहम्।

–बिल्व! दूरमपसर। एकान्ते कुंठां सहिष्णुरहं, दंदह्यमाना करिष्यामि प्रायश्चित्तम्। परमेश्वरात् कर्मक्षमां याचयिष्ये। प्रत्येकः कर्मफलमश्नुते, मयापि स्वकर्मफलानि भुज्यते, न तव दोषः। गच्छ! स्वतन्त्रोऽसि। स्वच्छन्दं विचर–इति कथयन्ती जरा-शिथिलपदा स्वकक्षे प्राविशत्।

बिल्वो द्विरावृत्तं समाजजीवनं क्रुधाऽक्रोशन् कुड्याश्म-शकलैः संघर्षितुमारेत्रे-"केन योजितः समाजः? एताः जातयो, वर्णाश्च मानवतऽवरोधिन्यो भित्तयः। नीचोच्चभेदभावाः, कर्मव्याख्याः, मानापमानस्तम्भाः, नैते भगवद्–विरचिताः, स्वार्थान्धवञ्चकषड्यंत्राणि सर्वाणि। पाखंडि-प्रपञ्चोऽयं। भगवत्कलनाजालम्, आरोपितं समाजे स्वार्थसाधकैः। भगवत्सभास्थले विलासनर्तनं शक्यते, बृहस्पतिसमाः देवाः, नारदसदृशाः महर्षयश्च तत्कलासु मुग्धाः भवितुं शक्नुवन्ति, किन्तु सामान्य-जनो नृत्यांगनया सम्बद्धुमक्षमः। नृत्यांगनाऽपि नारी, किन्तु नैषा वैश्या, नापमान्या, न च पापा। संघर्षयिष्यामि, तथाकथितं पापमेव पुण्यमुद्घोषयिष्यामि। कामपि मर्यादां न स्वीकरिष्यामि, न चावनम्रीभविष्यामि कुत्रापि।

तदानीमेवान्तर्मनः शनैरामन्त्रितम्–स्वार्थाय त्वया परंपरित-मान्यतायै विद्रुह्यसि। स्वार्थी त्वम्। त्वमेव सत्यं, समाजश्चानृतम्? दम्भोऽयं केवलम्। न कदापि विजयते दम्भी।

–समाजेऽस्मिन् नैव वसनीयम्।

–क्व पलायिष्यसेऽन्यत्र?

–संघर्षयिष्यामि सततम्।

–एकदा पराजितः पश्चात्तप्ष्यसि।

–नहि, नहि, कदापि नैवं शक्यते।

–तवाऽस्तित्वं विलोपयिष्यति पित्रोरभिशापः। कदापि नेष्यसि सुखम्। भृशमट्टहसितमन्तर्मनः। तत्प्रतिध्वनौ बिल्वोऽप्यट्टहसत्-क्षणमपि न व्यचलत्।

आत्मनैव संघर्षितं बिल्वेन, पञ्चदश-दिवसपर्यन्तं पदमपि नोद्धृतं सरित्तीरं प्रति। परिवर्तित-व्यवहारेणाऽनेन मातेव नाऽश्वस्ता, अपितु परिजनसदस्या अपि विश्वस्ता अजायन्त। औदासीन्यमेवाप्तं बिल्वेन। न केनापि संभाषितं, न च गृहात्प्रयातं क्वचित्। भाग्यवती मनस्येव प्रभुं प्रति कृतज्ञतां प्रस्तौतिस्म, बारंबारमकामयत बिल्वस्य सुखदभविष्यम्। तं परिणेतुं संकल्प-विकल्पान् व्यरचयत्। मान्यताऽसीत् तदीया यत्-उच्छृंखलयुवको मंत्रेण केनचिन्न वशीभवति, नांकुशेन प्रतिरुध्यते, तस्यकृते परिणयबन्धनमेव सफलमंत्रम्। काचित्सुन्दरी एव मोहपाशे नियन्त्र्य सत्सृजना यतं प्रेरयितुं शक्नोति। तस्याः मायापाशे मृग इव विवशो जायते युवकः।

सा स्वजनबान्धवमाध्यमेन परिणय-प्रस्तावान् बहुत्र प्रेषितवती, परं सर्वे जानन्ति स्म बिल्वचरित्रम्। तस्मात्संतोषप्रदा न्युत्तराणि नालभतसा। यतश्च कोऽपि प्रस्तावः संप्राप्तस्तत्रत्यकन्यां विलोक्य भाग्यवती स्वयं स्थगिताऽजायत। सा पुनः पुत्रं विक्षोब्धुमसहमताऽसीत्। कांचित् सुन्दरीं पुत्रवधूरुपे दिदृक्षुः सा वैफल्यभाराद् व्यथिता खिन्ना चाऽभवत्। एवं व्यथितामुद्विग्नां चावलोक्य बिल्वोऽपृच्छत्—

—मातः! अधुना तु प्रहर्षाऽसि ?

—बिल्व! तिमिरमद्यापि।

—अम्बे! कथं कष्टायसे ?

—वत्स! सुखमपि किमस्ति ?

—तवाऽज्ञामनुसरामि।

—ततः कथमवसीदसि ?

—गृहे वसन् जडवत्संजातोऽहम्। मातः! पाषाण एव भविष्यामि परं न त्वां संतापयिष्यामि।

—बिल्व! तवौदासीन्यं भङ्क्तुमनाऽहम्।

—नाऽत्र कोऽपि प्रभविष्यति। प्रकृतिव्यापरोऽयं, मनस्थिति—संक्रमणमिदं, यथासमयं स्वयं परिवर्तिष्यते।

—त्वदर्थमन्वेषयामि सुन्दर-कन्याम्।

—मातः! माऽनर्थंकुरु।

—वत्स ! गृहस्थधर्मोऽयम् ।

—कस्मिन्नपि धर्मबन्धने जीवितुमक्षमोऽहं । अवरुद्धः सागरोऽद्यापि गर्जनाव्याजेन वेदनां व्यनक्ति । बन्धने जड़ता, स्वातन्त्र्ये च जीवनविकासः । अम्बे ! नैव परिणेष्यामि ।

—धर्मविरुद्धं तदाचरणम् ।

—स्वकीयाऽचरणे विश्वसिमि ।

—कुलदीपस्त्वम्, यदि वंशानुवृद्धिर्न भविष्यति, चेत् पूर्वजाः साश्रुनयना अभिशप्स्यन्ते । अभिशप्तजीवनं न कदापि शममेष्यति । न च त्वज्जन्मापि सार्थकम् । किमाजीवनं तृष्णापयिष्यसि मातरं सुखकिरणलेशाय ? किमित्थं कष्टायिता प्रयास्यामि परलोकम् ?

—मातः ! भावनाप्रवाहे मा निमज्ज । तव सुखार्थं समर्पितोऽहं, परं बाधां मा स्थापय मज्जीवनयात्रायाम् ।

—आजीवनं पारे-नदीं वसितुमना त्वम् ?"—सरोषं कथितं तया ।

—काऽपत्तिः ?

—अधुनापि न विगलितस्तव हृत्कालिमा । तस्मिन्नेव पंकिले गर्ते आत्म हननाय संकल्पितं त्वया । कुलमर्यादां निज-भविष्यं चोपेक्ष्य तिमिरान्धकारे निमज्जितुमग्रे-सरसि । मूर्ख ! स्वजन्मलक्ष्यमपि नावगच्छसि ।

—संसारे प्राणि-जन्म भोगाय केवलम् । कश्चित् संयमितो भुङ्क्ते, अपरश्चोन्मुक्तं विलसति । नात्र कश्चिदस्पृश्यः, न त्याज्यो न च हेयः ।

—वेश्याऽस्ति पापप्रतिमा ।

—अयि मातः ! संसारे प्रत्येकं वस्तु एकेनैव शक्तिस्रोतसा निर्मितं वर्तते । येन वयं लाभान्वितास्तत् पुण्यम्, येनास्माकं काचित्क्षतिस्तत्पापम् । मांसभक्षणं सर्वथा पापं, किन्तु यत्राऽन्नाभावस्तत्र पुण्यं, तदेव जीवनरक्षणाय । मानव-निर्मितमिदं भ्रष्टसंविधानं नाहं मन्ये ।

—पिशाचस्त्वम् । ब्राह्मणगृहे प्रसूतोऽपि कुत्सितमतिः । अद्य वेश्यावेश्मनि निवसनं पुण्यं भणसि, श्वस्तु तामेवानीय गृहं तीर्थयिष्यसि । लिखितं भाग्ये कलंकम् गतजन्मपापान्येवाऽद्य फलितानि । नात्र तव दोषः ।

—मातः ! व्यर्थं कष्टायसे ।

–कथं जानीहि मातुर्हृदय-विकलताम् ? बिल्व ! वात्सल्यानुबन्धिता ममता, नो चेत् नास्तिकं निहत्य स्वात्मनि पुनातुं प्राभविष्यम् । यदि नारीहृदये वात्सल्य सागरो नाप्लविष्यत्, तर्हि न रावणोऽभविष्यत् न च कंसः । ममतैव रामं प्रादुर-यावयत्, रावणञ्च प्रासूयत ।

–मातस्त्वं रूढि-बन्धिता । प्रत्येकां नवीनां वार्तां, क्रियां, वृत्तिञ्च पापायितां पश्यसि । कश्च मेऽपराधः ? विवाहमेव न विधित्सामि केवलम् । सन्ति मादृशाः बहवो युवकाः; आजीवनं वर्तिष्यन्ते येऽविवाहिताः । निश्चीयतां तावत्-अभवत्पुत्रः संन्यासी ।

"वरं चेद्, अभविष्यत् सन्यासी"—भणितं भाग्यवत्या, भित्त्या शिरो विदारयन्त्या ।

–सदैवार्थं गृहात्प्रयास्ये ।

–हर्षिता भवितास्मि तस्मात् ।

–जीवितुं पारयिष्यसि मां बिना ?

–बिल्व ! किमर्थमिदानीं जीवनम् ?

–इयती व्यथिता मत्तश्चेन्न निवर्तिष्ये कदा गृहम् ।

–वसिष्यसि पारे-नदीम् ?

–नैव, पारेऽपि न यास्यामि ।

–मातृसमक्षेऽप्यनृतं प्रलपसि ?

–मातः ! प्रतिजानामि चेत्, त्वयि जीवत्यां न कदापि पारे यास्यामि । आजीवनं संतपस्यामि, परं त्वत्प्रतिष्ठां न मलिनयिष्यामि ।

–वत्स ! कामये तवैव हितम् । परिणय-व्यवस्थितं यदि भवेद्गृहं, तर्हि त्वमपि सुखी भूयाः । तव प्रसन्नदाम्पत्यं विलोक्य क्षणं संतुष्यामि, सुखेन निश्वसिष्यामि । ह्य आगीत् तव पिता चिन्तितः, अद्याहं, श्वस्तु स्वयमेव चिन्तयिष्यसि ।

–मातः ! तपनाय विमुञ्च मामेकाकिनम् । संभवतः प्राप्नुयाम् नवदिशां संघर्षानन्तरम् ।

–वत्स ! जरावस्थायां मामसहायां त्यक्षसि ?

–नेच्छामि गृहात्प्रयातुं, परमत्रापि व्यथते तवात्मा मद्वसनाद्, नाऽन्यो विकल्पः– असहाय इवाऽवदद् बिल्वः । सुताननं निरीक्षमाणा तूष्णीमभवत् माता ।

सजलतरलानि अभवत् तस्याः पक्ष्माणि, परं नावारौत्सीद् बिल्वम् । विध्वंसितो भ्रमः । वात्सल्यपाशे नियन्त्रितुं नाऽपारयत् ममता । बिल्वाऽन्यमनस्को द्वाराद्निर्गतः ।

—लक्ष्यविहीनोऽद्य गृहात् निर्गतो बिल्वः । स्वसंकल्पं,प्रतिज्ञां च ध्यायन् पुनः पुनः पदानि निवारयितुमचेष्टत, परं परिखा-स्खलित इव स्वात्मानं धिक्कारयन् पराजितमना नदीतीरमेव प्रापत् ।

—बिल्वं विलोक्य परितः समागच्छन् नाविकाः, बहुधा परिचर्चां च प्रारभत, परं नैकमपि प्रत्युत्तरितवान् सः । शनैस्तीरमनुगच्छन्नग्रे प्रायाद् बिल्वः । परिवर्तितं तद्व्यवहारं विलोक्य विस्मिता आसन् नाविकाः । केनचिद् अनुमानितं "पाषाणयितो बिल्वः," अन्येन भणितम् "प्रेम्णि प्रमत्तः" । तृतीयेन गदितं—"किन्तु आसीदयं दृढ संकल्पः" । इत्थं सर्वे प्रश्नान् विवर्ष्य बिल्वपृष्ठं निरीक्षमाणास्तूष्णीं जाताः ।

—अग्रेसरन् बिल्वो निर्जनसिकतात पे सनिःश्वासमुपाविशत् । एकान्ते स्वात्मानं सुखिनमनुभवन् सः नेत्रे सम्मिलितवान् । नात्र कोऽपि पृष्टा, न चोत्तरे आलोचकः । स्वीकृतवान् सो यत्, सम्बन्धाः मानवमनुबध्नन्ति, स्वातन्त्र्यं विमुष्य च पंगुयन्ते । यदि संबन्धभारान् अपहाय मानवो वैयक्तिकधरातले निःश्वसेत् तदैव सुखी शक्नुयात् ।

—सरित्प्रवाहे प्रसारितौ तेन स्वपादौ, सिकतायामेव शयितञ्च । प्रवहतो जलस्य शीतलस्पर्शतः स्पन्दितं तस्यान्तर्मनः । इत्थमानन्दक्षणेषु संमोहितः सः यावत्सध्यां तथैव शयितवान् । संध्यायाः सिन्दूर-सौन्दर्येणाऽनायासं भङ्कृतं तन्मनः । दूराद् प्रतिध्वनिता स्वरलहरी विकलयितुमारेभे, परं यथाशक्ति संयमितं तेन स्वान्तः ।

—तदानीमेव लोलक ल्लोलप्लवलेनाऽप्लावितः उत्थाय चोपाविशत् । पारेजलं तस्य निर्निमेषनयने प्रसरिते, दूरं वृक्षयन्तरा ज्वलितं दीपं दृग्गोचरीभूतम् । आसीत्चिरपरिचितो बिल्वो दीपेनाऽनेन, परमद्य तं विलोक्य स्मितमपि नैच्छत् । तदानीमेव केनचित् कर्णे शनैर्भणितम्—"पराजितः किम् ?"

—परितो विलोकितं तेन, परं गहनशून्यतातिरिक्तं नासीत् कोऽपि ।तदानुमानितं यत् मनसि निगूहिता भाननैव अन्तर्द्वन्द्वायते । अथोत्थाय प्रयातुं प्रचक्रमे तदानीमेव स्वरान्तरो ध्वनितः— "पलायसे ?"

—दृढस्वरेण प्रत्युत्तरितं—"कथं पलायिष्ये ?"

—पुनः कथं न यासि पारे-जलम् ?

—न यास्यामि ।

—मूर्खस्त्वम् । प्रतिज्ञातं त्वयाऽजीवनं सहवासाय, इयत् सत्वरं विस्मृतम् ।

—मातुः समक्षेऽपि प्रतिज्ञातम् ।

—क्व वसिष्यसि ?

—सरित्तीरेऽत्रैव ।

—भिक्षुको भूत्वा ?

कस्मादपि न किंचिदिष्यामि ।

—क्षुत्पिपासार्तो विधास्यसि आत्महत्याम् ?

—कस्मात् ?

—अद्यावधि पैतृक-सम्पत्तिमनुजीवसि, न कदापि श्रमञ्चाचरः । पैतृकमध्यवसायं विहाय कुत्र पलायसे ? पारे गन्तुं शिथिलसंकल्पश्चाधुना नवीनं संकल्पयसे ? कियत्क्षण विश्वासेऽस्मिन् जीविष्यसि ? त्वादृशाः अस्थिरमतयः संसारे कदापि सफलितुं न प्रभविष्यन्ति । पराजितस्त्वं प्रतिक्षणं पराजेष्यसे । स्वसंकल्पमपि द्रढयितुं अक्षमः ?—स्वराड्ढासो नदीतटे विघट्टितः ।

हतप्रभः स्तब्ध इवाऽभूत्सः । स्वान्तर्द्वन्द्वेन विलोडितो मनस्येवाऽक्रन्दत् । यथा-यथा तिमिरावरणं गहनायते स्म, तथा-तथा तत्संकल्पबन्धनमपि शिथिलायते स्म । तामसदलं विदारयन् स गृहं प्रतस्थे । अद्यासीत् प्रथमं क्षणं, यत्र तच्चरणौ भारायितौ प्रतीयेते स्म । श्रान्तः क्लान्तः सोऽग्रेससार, तदानीमेव चित्परिचिताऽन्तर्ध्वनिरश्रावि—"किमद्य पारे-जलं न यास्यसि ?"

—स्मितवान् सः, परं तमसि न ज्ञातं केनापि ।

—नोत्तरिष्यसि किमधुना ?.....

—नाविकमुपागच्छत्, अध्येतुं प्रायतत तस्याकृतिम् च बिल्वः ।

—बिल्व ! कथमद्य सहसा धारा परिवर्तिता ?

—नाविक ! धाराक्रमः शाश्वतः, नैषः परिवर्तते, क्षणं यावदुपस्थीयन्ते बाधाः, तदानीं जड़वत् प्रतीयते गतिस्वरूपम्, किन्तु वस्तुतो न भवति गतिव्यतिक्रमः ।

—सत्यं ब्रूहि, पारं न यास्यसि ?

—नैवाऽद्य ।

–पूर्वमेवाऽजानाम् यद्-एकदा पारे गन्तुं विरक्तो भविष्यसि, एतदर्थमस्वी करिष्यसि च। बिल्व ! नास्ति पारे किंचित्, मिथ्याभ्रमः सर्वः। वर्तते तु इहानन्दः, पारे मृगतृष्णा सदा। मत्कथनमनुसरन् रचय परिणयम्।

–न याचे त्वत्सम्मतिम्।

–अपि कुपितोऽसि ? सामान्योऽहं प्राणी, दिनावधि मत्स्येषु जालं प्रक्षिप्य जीवामि, परं यदा रात्रौ निजोटजे निर्वते, तत्र स्नेहविश्वासप्रकाशितयोः प्रियाक्ष्णोर्निजं प्रतिबिम्बं निरीक्ष्य दिवसश्रमं विस्मरामि। तदा ीमनुभवामि स्वर्गिक सुखम्। ग्रामस्य सर्वाऽट्टालिकास्तृणवत्तुच्छाः प्रतीयन्ते।

–अत्यधिकं स्निह्यसि भार्यायाम् ?

–नाहं जाने, किमस्ति प्रेम। परं परस्परं विश्वसिवः, अन्योन्य–पूरकौ स्वः।

–अप्यतीव सुन्दरी तव जाया ?

–ततः परा न काचित्।

–जिज्ञासा विजृम्भिता बिल्वनयनयोः। सहजं भणितवान्—"पारस्थसौन्दर्यादप्यधिकम् ?

–पारे केवलं सौन्दर्यं, किन्तु ममोटजे विश्वासोऽपि। बिल्व ! यदि पारेऽभविष्यत् विश्वासस्तदा सम्पूर्णजनपदो नैवाऽनिन्दिष्यत् ताः सौन्दर्यप्रतिमाः। अभविष्यन् ता अपि केषांचित् गृहशोभाः, किन्तु व्यलोपयन् विश्वासं ताः। अतो दूरदेशशोभाः अजायन्त।

–भ्रममिमं विध्वंसयिष्यामि।

–गृहं न यास्यसि साम्प्रतम् ?

–नैव।

–नक्तम् तावदत्रैव स्थास्यसि ?

–अन्यत्र स्थानं क्व ?

–मया सहचर।

–नहि,

–किं प्रमत्तोऽसि ?

—नाविक ! जीवामि यासु अवस्थासु, तामवस्थामुन्मादमेव भणन्ति सामाजिका ; किन्तु वास्तविकताऽभिज्ञाः नैते दोषिणः । गच्छ तावत्, प्रतीक्षते त्वत्तरी ।

—सरित्तीरमुपवेशनापेक्षया मद्गृहं समागच्छ ।

—नहि,

—"अस्तु तावत्"—कथयन् प्रस्थितो नाविकः ।

तिमिरावरणे स्वात्मना संघर्षरतो बिल्वः पारे-नदीं गन्तुं नोत्साहितः । मातरं विद्रुह्य निरगच्छत्, परं तन्ममत्वेनाऽन्दोलितं हृदयम् । ततः स्वमेव धिक्कारयन् जनपदं प्रतस्थे । स्वीकृतवांश्च मातृवात्सल्यम्, नाऽपारयत् जननीं बिना जीवितुम् । हा !!! मातु समक्षे प्रतिज्ञातं मया यन्नेष्यामि पारे-नदीं, परं मद्विद्रोहेण निर्गमनेन च नूनमचिन्तयत् माता यत् "असत्यवक्ता पुत्रः" ।

तीव्रतरं पदानि न्यसन् गृहं प्रापत् बिल्वः । आश्चर्योऽभूत् गृहद्वाराणि दृष्ट्वा प्रतीक्षायामनावृतानि । आभ्यन्तरीभूय जननीमाह्वयत्, परं नाऽकर्णितवानुत्तरम् । तदा मोमवर्तिकां प्रकाश्य मातरमन्वेष्टुं प्रारेभे । पूजागृहे भगवत्प्रतिमाऽभिमुखं समुपासीना दृग्गोचरीभूता माता । बिल्वेनाऽनुमानितं यत् पुत्रस्य सुखदभविष्याय प्रार्थयते प्रभुं माता ।

दृष्ट्वैं तत् बिल्वोऽहंकारेण गर्जितवान्—मातः ! निष्ठुरोऽयं भगवान्, नाकर्णयति त्वत्प्रार्थनाम् । अत्रापि पक्षपातः, समृद्धानामेव स्वीकरोत्याराधनम्, न तु दीनहीनानाम् । अतः परं न याचिष्यसे निर्दयात् प्रभोः । अम्बे ! पराजितोऽहं, त्वमेव विजयिनी; अतः परं नैव यास्यति बिल्वः पारे-नदीम्, त्वत्सुखाय अस्मिन्नैव गृहे वसिष्यति । मातः ! उत्तिष्ठ, किं भगवता मत्संभाषणादपि निवारितासि त्वम् ?

—भाग्यवती ग्रीवामपि परावर्तितुं नाचेष्टत ।

—मातः ! रूष्टासि ? न क्षन्तव्योऽहं ?, किं न विश्वसिषि बिल्वे ?

—एवं गदन् पूजागृहान्तरमगच्छत्, व्यचालयच्च मातुर्देहम् । किन्तु निर्जीवं तच्छरीरं भुजयोरवलम्बितम् । चीत्कारितं बिवल्कंठेन—मातः ! किमिदं विहितम् ? प्रतीक्षापि न कृता बिल्वस्य ।

जनपदः प्रबुद्धः, परं बिल्वस्य ममता चिरं निद्रिता ।

+ + +

परिजनसदस्या अपि जुगुप्सन्ते स्म तस्मात्। ततोऽधिकतरमनियन्त्रितोऽभूद् बिल्वः। पूर्वजसम्पदां प्राप्य मुक्तजीवनं समाचरत्। यत्र कुत्रापि सौन्दर्यं विलोक्यते, तत्रैव जड़वद् अजायत। विलोक्येमां विकृतावस्थां सर्वे चिन्तिताः। पारे गन्तुं न निवारयति स्म कोऽपि साम्प्रतम्। अहरहः सन्ध्याकिरणसिन्दूरेण सह अवतरद् वेश्या-वसतितले, परावर्तत प्रातःकिरणसहचरः सो बिल्वः। आसन्ननेकाः वेश्याबसतयः पारे-नदीम्। अवसन् तत्र प्रवीणनृत्यांगनाः सुन्दर्यः। कस्मिंश्चिदपि वेश्मनि प्रविष्टो बिल्वः समग्रनक्तम् नृत्यानन्दोन्मादे भोगविलासे च निमज्जितोऽवर्तत। दूरदेशीयाः धनाढ्याः धर्मधुरंधराश्चापि तेषु वारांगना-विलाससदनेषु समागच्छन्ति स्म, द्वित्राणि दिनानि च विलस्य प्रयान्ति स्म। किन्तु बिल्वस्तु प्रतिनक्तम् तत्रैव यापयति स्म। प्रत्येका नर्तकी तमवाप्य धन्यंमन्यमाना स्वागतं व्याहरति स्म, यतोहि बिल्वो न केवलं शरीरेणाऽकर्षकः पुष्टपेशलश्चासीत् अपितु कामकलानदीष्णोऽप्यवर्तत। नृत्य-कलायां तु विशेषज्ञरूपेण प्रथितो बिल्वः कस्याश्चिदपि एकस्याः सुन्दर्याः मोहपाशे न नियन्त्रितोऽभूत्, एतस्मात् सर्वाः वारांगनाः मनस्येव ईर्ष्यन्तेस्म तस्मै। प्रतिनयनं कटाक्षपाशेन नियंत्रितुं प्रायतत किन्तु मुक्तम् व्यलसत् व्यचरच्च बिल्वः। नाविक समक्षमुद्गिरति स्म हृदयभावान् सः, नाविकस्तु प्रतिदिनं पराऽमृश्यत् तस्मै तदेव यत्—"तिमिरान्धकाननेऽस्मिन् नास्ति कुत्रापि प्रकाशकिरणलेशम्"। परं नाऽशृणोत् तत्परामर्शं बिल्वः। कदाचित्तु उद्वेजितोऽभवत् परामर्शप्रवचनेन। एकदाऽपृच्छत् बिल्वः —"कथं व्यथयसि"?

—त्वदर्थम्।

—त्वन्मनसि परस्मै दया?

—कथं न; किं नाऽहं मानवः?

—तर्हि मुग्धमृदुल-मत्स्यान् कथं गृह्णासि, किमर्थं पाशं प्रसारयसि? कियद्वैरं प्रतिशोधयसि? प्रतिदिनं सहस्रधा हिंसाप्रवृत्तस्य हृदये दया समुदीयते—"हा! हा!" अट्टमहसत् बिल्वः।

—आजीविकेयं मदीया।

—मदीयानन्दश्चात्र। धीवर! परेषामानन्दे विबाधा नैव धार्मिकता। भविष्यति मा पीड़य मदर्थमात्मानम्।

—ततश्च पराङ्मुखीजातः परामर्शाद् धीवरः।

\+ \+ \+

वेश्यावेश्मानि आसन्नुपवनश्लिष्टानि। परितो विस्तृतः हरीतिमा, विविध-वर्ण-गन्धान्वितानि सुमनानि, किशलयपेशलानि लतानिकुञ्जानि च शुशुभिरे, पर-मेतादृशसुषमासाम्राज्येऽपि नासन् ताः हर्षिताः। मादकप्रसूनसुरभिणाऽपि नाऽमोदन्त अहर्निशं जिघ्राणा वारांगनाः। तत्राऽगन्तुकानां तु पुष्पसुगन्धेन नापूर्यते किमपि प्रयोजनम्, न च सुमनसौन्दर्येण कश्चिदनुरागः। तत्रागतः सर्वः शरीराय लिप्सते, कदुष्णकायार्थं च बुभुक्षते। मृदुलमांसलोलुपेषु तेषु न कस्यचित् वर्तते मनसि पिपासा। वसतिप्राङ्गणेषु प्रत्यूषं भासते भास्करः, परन्तु वारांगनाहृदयगृहाणि दिवापि तिमिरायन्ते। तिमिरकलुषिते च तमीविताने देदीप्यते तत्रत्यवातावरणम्। अमाग्रसितेऽपि तत्र ज्योत्स्ना प्रसार्यते, ननु समागतमनस्तमोमलं निवारयितुं प्रयत्यते।

उषावेला तु तत्रत्या नितान्तमुदासीनाऽभवत्। आलस्य-विद्रूपतायाः साम्राज्यमिव प्रासरत्। ननु समागतधनिकानां मनोमलानि निवारयितुमक्षमा समग्रवसतिः पराजितेव, समग्रज्योत्स्ना विलुप्तेव, समस्तोल्लासो दलित इव। श्रान्त-क्लान्तानि नूपुर-किंकणानि विशीर्णानि व्यञ्जन्ति किल निजवैफल्यम्!

तथापि प्रियतरा बिल्वाय सा नगरी। आसीत् राजा सः तत्रत्यः। प्रतिद्वारं तत्स्वागतायाऽनावृतमवर्तत। प्रतिवातायनं तं प्रतीक्षतेस्म, कटाक्षमिषेणाऽमन्त्रयच्च। प्रत्येकस्याः भुजालिंगनं विकलायते स्म तदर्थम्। प्रत्युरसः स्पन्दनं समुच्छलति स्म बिल्वाऽश्लेषाय।

जीवनक्रम एव परिवर्तितो बिल्वेन पित्रोरवसानान्तरम् नाऽपेक्षत कस्मै, न च कस्यापि सम्बन्धमनुमेने। तत्संबन्धिन्यस्तु वसतिवारांगनाः एवाऽवर्तन्त।

एकदा विभावर्यां तरणि-समारूढं तं समसूचयद् धीवरः—

—"अद्य तव नगर्यां सौन्दर्यसाम्राज्ञी समागता"।

—सौन्दर्येश्वरी?

–आम्; मयैव पारे प्रापिता।

–अपि नूतननृत्यांगना ?

–बिल्व ! सातीव सुन्दरी। न जाने कथं वेश्यायमाना सा राजकुमारी ?

–क्व त्वं, क्व च सौन्दर्यपरीक्षा ?

–अदृष्टपूर्वं तत्सौन्दर्यम्। तन्नयने निरीक्ष्य विस्मितोऽहं। जाले ग्रसितायाः मत्स्यायाश्चाञ्चल्यमपि तिरस्कुर्वाणे ते नयने। अहो ! विधिना समग्रविग्रहं रूचितः संटङ्कितम्।

–अपि कस्याश्चिद् अतिथिभूता ?

–नहि; अत्रैव वसिष्यति।

–क्व पुनरुषिता ?

–चिर-पिहिते पुरातने प्रान्तभवने।

–कस्येदं भवनम् ?

–श्रूयते यत्–कदाचिद् हीरामणिनामा न्यवसद् वेश्या। प्रचुरं प्रतिष्ठा शिक्षा ज्ञानकौशलेन सा। महन्त-महोदयोऽपि समागच्छत् तत्समीपे।

–तदवसानाद् रिक्तम् भवनम् ?

–गलितयौवना सा वृन्दावनं प्रयाता, तत्र च मीरावत् भक्तिनिमज्जिताऽभूत्।

–अहो ! जीवनपर्यन्तं भोगानन्तरं भगवद्भक्तिः ? एतदपि सुष्ठु आडम्बरम्। प्रचुरं विज्ञाऽसीत् सा, यदा धनाढ्य-ग्राहकास्तदुपरताः, देहगन्धे विलुप्ते भ्रमरैस्तिरस्कृता, तदा काषायवसना धर्मपरिधाना च शेषाऽयुः प्रतिष्ठया यापितवती।

–किमियं तत्कुलीना ?

–हीरामणिर्मातामहासीद् अस्याः।

–इयती रुचिः ? प्रचुरमन्वेषितं त्वया। ज्ञापय तावत् कीदृशं भविता अस्मत्-मिथुनम् ?

–बिल्व ! त्वद्-योग्या अपूर्वेयं ललना।

–अधुनैव देवीदर्शनं प्राप्स्यामि तावत्।

–भगवान् त्वां सफलयतु।

–"अपि संदिह्यते त्वयाऽत्र ?"—कथयन्नपश्यद् बिल्वो पारे-नदीम् । प्रान्तीय भवनच्छदि प्रदीप्तमाकाशदीपं चकासे ननु सागरोरसि भ्रमितयात्रिणां कृते दिशादीपं प्रकाशते । पारमवतीर्य तद्भवनं प्रत्ययात् सः । बहिरेवोद्यानप्राङ्गणे सोमवर्तिका-ज्योत्स्नान्तरिता सा दृष्टिपथं प्रापत् । यथा मेघान्तरिता पाटलपुष्पायिता तनुः परागरजांसि प्रस्रवतीव । जानुलम्बिता वलयिता च कृष्णकचवेणी तस्याः सुधाऽन्वेषणतत्परा नागकन्येव गतिशीलाऽवर्तत । किंचिद् अग्रेऽसरन् बिल्वोऽपश्यत्—तन्नयने मदिराप्लावितचषकायिते ध्रुवम् ! सहसा मुखादुदीरितम्—

–"सत्यं भणितं धीवरेण" ।

–"अपि परिचितोऽसि सत्येन ?"—पीयूषधारेव प्रसृता युवत्या अधरबिम्बात् ।

–क्षणं यावत् स्तब्धोऽभवद् बिल्वः । अथ चात्मानं स्वस्थं भावयन्नुवाच—"स्वयमहं सत्यम्" ।

–भ्रमे जीवसि ।

–कथमेतत् ?

–"सत्यं तावदहम्"—भणितं सुन्दर्या ।

–इदमपि सत्यम् ।

–किम् ?

–उभौ सत्यम् । सत्यमेव ऋतं साक्षात्करोति ।

–स्मितहासो विकीर्णः युवतीमुखे, ननु निशाजलधौते नलिनीदले प्रत्यूषलालिमा प्रसूतः ।

–चिरं यावद् भ्रमितोऽसि ?

–सुन्दरि ! सत्यं नैव भ्रमति ।

–नाहं सुन्दरीनामा ।

–रूपसुन्दरी तु वर्तसे ।

–मुग्ध ! युवक ? भवति सत्यं सदैव सुन्दरम् ।

–शिवं चापि ।

–"दृष्टेर्वैभिन्न्यम्"—युवत्या तदन्तर्गाम्भीर्यमन्वेष्टुकामया भणितम् ।

–नैव दृष्टेरपितु रुचेर्वैभिन्न्यम् ।

–रुचिश्च भवति स्वार्थप्रेरिता ।

–स्वार्थेन सत्यसम्बन्धः ? संशयोऽत्र विजृम्भतेयत् अधुनापि सत्ये स्वार्थ-साम्राज्यम् ।

–मुक्तान्तराले किं वर्तते ? केनेदं विदितम् ? सर्वे उपरिष्टात् परीक्षन्ते, मूल्यं निर्धारयन्ति च, तदेव कथ्यते सत्यम् "कियत्सुन्दरं भवति तत् ?"–लोल-वीचि केलिषु विलोचयन्ती विहगपक्ष्म-निमज्जनं शनैरूवाच सुन्दरी ।

–बाह्यसत्यं नाऽङ्गीकरोमि ।

–मिथ्या वदसि ।

–कथं न विश्वसिषि ?

–अतिथे ! सौन्दर्य-समुपासकोऽसि केवलम् । बाह्यज्योत्स्ना-व्यामोहे नितान्तं भ्रमसि । नान्तराले प्रकाशः, तत्रान्धकन्दरा एवास्ति । गहनप्रविष्टोपि प्रकाशलेशं न प्राप्स्यसि । दीर्घकुण्ठाग्रसितायाः यात्रायाः पश्चादन्ते प्रकाशमणिर्दीप्यते, किन्तु तत्राप्तुं न कोऽप्यशक्नोत्, प्राप्तश्च निवर्तितुमक्षमः ।

–अज्ञातं प्रति नाऽस्थान्वितोऽहम् ।

–यतोहि प्राप्तिसामर्थ्यादतीतं तत् ।

–नहि, भ्रममात्रमिदम् ।

–तर्हि, किं सत्यम् ?

–त्वम्, अहञ्च ।

–एकत्र सत्यद्वयम् ?

–एकमेव बहुत्र राजते, अनेकतया सत्यं स्थाप्यते ।

–युवक ! निर्वतस्व; नाऽस्मिन् तिमिरे कुत्रापि सत्यम् ।

–त्वमपि नैव ।

–"एवमेव जानीहि"—विवशेव सात्मानं आश्वासितवती ।

–किं नामधेयाऽसि ?

–नाम त्वसुन्दरम् ।

–नाम निर्धारकस्य त्रुटिरियम् ।

–एवं निगद्य हृदयं संतोष्यते केवलम् ।

–अहमपि संतोषपूर्वकं भणिष्यामि त्वन्नाम ।

–अधैर्यस्य नाऽवश्यकता । "चिन्तामणि" रिति संबोध्यते जनैः ।

–बिल्वनामाऽहम्, अस्मिन् वसतिसमाजे·····।

–"पूर्वप्राप्तो भवत्परिचयः"—मध्ये विरामयन्ती जगाद सा ।

–कस्मात् ?

–यस्मान्मदीयसूचना भवता प्राप्ता ।

–अस्तु; धीवरेण कथितं सर्वम् । तस्मिन् नैव विश्वसिमि भवत्याऽपि नाऽत्र विश्वसनीयम् ।

–स्वात्मनि विश्वासो मे ।

–अत्राऽगमन-प्रयोजनं भवत्याः ?

–मुक्तहासेन दशनकिंजल्काः प्रदर्शितास्तया ।

–संकुचितो बिल्वस्तस्याः विहसनाद् ; हसनकारणं प्रष्टुमक्षमः क्षोणीं क्षोदयामास निम्ननयनः ।

–कथं तूष्णीं जातोऽसि ?

–हासमनुबन्धितं मौनं मधुरं भवति ।

–प्रचुरं चतुरोऽसि ।

–परं नाऽहं धूर्तः ।

–परिचिनोमि ।

–सौभाग्यमेतन्मदीयम् ।

किं सेवे साम्प्रतम् ?

–दर्शनकामनया समागतोऽस्मि ।

–का सेवा मद्योग्या भवताम् ?

–स्नेहसंभाषणम् ।

–विपणोऽयम्, वयं चापणाः । सर्वं विक्रयते चात्र । विपणीवीथिषु क्रय-विक्रयव्यापारशीला सु व्यवहारभाषायाः कुतः स्थानम् ? ग्राहकसंकुलोऽयं विपणः ।

–अत एव पृच्छामि—"कस्मादत्र भवत्याः वासः ?"

–बिल्वमुपहसन्ती सोवाच—"स्पष्टमत्रागमन-प्रयोजनम् ।

–चिन्तामणे ! भिन्ना त्वं विपणादस्माद् ।

–त्रुटिरियं भवताम् ।

–कथय किमपि, परं विधिना घोरतरोऽन्यायो विरचितस्त्वया सह ।

–नाहं कदापि दोषयामि विधिम् । पवित्रमिदं मे कर्म; कर्मण्यास्थैव धर्म-श्रद्धा कथ्यते ।

–संतुष्टासि कर्मणाऽनेन ?

–सौभाग्यं मन्ये ।

–समाज-मान्यता, तद्घृणा चेत् ?

–अन्येषां कृते सा मान्यता घृणा वा ।

–किं त्वमपि जुगुप्ससे ?

–प्रवृत्ति प्रसक्तिस्तु सर्वेषु जायते ।

–न त्वमधिकारिणी ।

–अतिथे ! मनोवृत्तीणां प्रसारः सदा संघर्षयति, मनोगर्जनाऽन्दोलनेषु न कस्याप्यधिकारः ।

–विक्रयशीले वस्तुनि क्रेतुरधिकारे भवति ।

–मानसमूल्यं नैव प्रदीयते ।

–विक्रयन्ते मनांस्यपि ।

–सहजेन ।

–विपणेऽस्मिन् सहजसुखं नाऽवाप्स्यसि कदापि ।

–निजमन्तव्यं, निजं सौख्यम् ।

–अनुभवसि शर्माऽत्र ?

–त्वं किमर्थमायासि ?

–मुक्तभोगाय ।

–चेदनुभवसि तदानन्दम् ?

–बन्धने नैव विश्वसिमि ।

–बन्धनं विना भोगतृप्तिरपि नास्ति ।

–चिरमतृप्तिकामाऽहम् ।

–विचर तावद्, अत्रापि नास्ति तृप्तितीर्थम् ।

–चिन्तामणि ! अद्यावयोः प्रथमरजनी, मधुमयवेलायामस्यामपि नीरस वातावरणनिमग्नावावाम् । त्वदीयधर्मस्तु अतिथेः प्रसन्नता ।

–क्षमस्व; त्रिदिवसान्तरं शुभमुहूर्ते सभामायोजयिष्यामि, मन्दिराधिपतिरपि समेष्यति । भवतेऽपि निमन्त्रणम् ।

–किमिदं भणसि ?

–अस्मद्-व्यवसायोऽयम् । अस्माकमपि परम्पराः सन्ति । इतिहासपरिवर्तने त्वक्षमाऽहम् ।

श्रुत्वैतत् स्तब्धोऽभवद् बिल्वः । प्रथम क्षणं जीवनस्याद्य, यस्मिन् कयाचित् नर्तक्या शुष्कमुत्तरितम् तस्याः रूपसौन्दर्यं मनस्येव प्रशंसन् नयनदर्पणे निजबिम्बं विलोकयामास । अन्ततः पराजितस्वरेणाऽवोचत्—"कदापि निराशो न निवर्तितवान् वसतितः" ।

–ईदृशातिथिं प्राप्य वसतिर्गौरवान्विता ।

–श्वः पुनः संगमिष्यामि ।

–क्षम्यताम्, श्वस्तु व्रतमाचरिष्ये । सप्ताहे दिवसमेकं मौनमाचरामि ।

–किमपि कथयितुमक्षमो, बिल्वः श्रान्तशिथिलपदैरग्रेसरितोवसत्याम्, परं कर्णविवरेषु चिन्तामणेरेवाऽट्टहासो ध्वनित आसीत् । विचलितोऽद्य नार्याः अहंकारात् ।

\+ \+ \+

आसीत् पुष्य-नक्षत्रीयं शुभलग्नम्। मंगलमयवेलायामस्यां कृष्णावेणी-सरित्तीरे मधु-महोत्सवः समायोजितः। चिन्तामणि-प्रासादः सुरभितसुमनाऽमोदैरासीत् सुगन्धितः। पाटलेत्रमित्रं समीरण-सरणं श्वासोच्छ्वासेषु संचरत् मनो मुग्धीकरोति स्म। मृदुलास्तरेणषूपसन्दिकाः व्यवस्थिताः, सम्मुखे च रजतपुटकेषु सुरंजिताः नारिकेल-कलाञ्चिताः पूंगीदलराशयः संशरिताः। महोत्सवेऽस्मिन् समग्र-नगरमा-मन्त्रितमासीत्। मन्दिराधिपतये महन्तमहोदयाय विशिष्टासनमपि व्यवस्थिम्। घृणा-नगर्यामानन्दतरंगाणि समुच्छलितानि।

मुहूर्तावसरे शिष्यसमेतः पौरपरिणीतो महन्तमहाभागः समागत्य विशेषासन-मुपाविशत् बिल्वोऽप्यासीद् समुदाये आसन्दिकाश्रयः। अद्भुतमिदमायोजनं पश्यन्नभ वद् गंभीरः सः। ततश्च तुमुलशंखध्वनिसहाया चिन्तामणिः प्राविशत् समाभवने। गौराङ्गानि तन्वङ्ग्याः कुंकुमवर्णीयसाटिकान्तरितान्यपि कामुकचक्षुभिश्चुम्बि-तानि। कर्णिकारकुसुमगुच्छान्तराले चम्पककोरकाणीव समुद्भूतानि तदङ्गानि स्पर्धया। नितम्बमालम्बिताऽसितकेशवेणी रजतशिलाखचिता कस्तूरी-रेखेव वलयिता दोलायते स्म। ज्योत्स्नापूरितं मुखमण्डलं दर्शकहृदयतिमिराण्यपि बलाद-पनेतुमिवाऽचेष्टत कर्णावतंसीकृते पाटल-कमले मकरन्दमिव पाययती चास्तां तृषित चक्षुषी। प्रतिपदन्यासे मुक्तारजितं संगीतमिव सृजति स्म श्रोतृश्रवणेषु तरुणी मयूरीव मन्दं-मन्दं साग्रेसरिता, ननु काचित्तरणि-विपरीतसमीरणे जलवीचिषु तीर्यते। तदनु गत्या चाञ्चल्यं, नूपुरै सम्मोहनं, मादकांग्रैः किशलयमार्दवम्, नयनैरनंग-नियंत्रणमिव प्रस्तुवन्ती कटैरलक्तकरक्तैः पुष्पाञ्जलिं विकीर्णवती। अथ च विद्युल्लतयेव कान्त्या प्रदीप्तं सभाभवनं तया। दर्शकगणाश्चित्रलिखिताः, मन्त्रमुग्धाः, मूकाः संमोहिताः, स्तब्धा इवाऽजायन्त। चिन्तामणिश्चंचलेव चमत्कृता, व्याप्ता, समापतिता, प्रभाविता च दर्शकहृदयेषु।

वैदिकमृचमुद्गीयत मंगलाचरणाय, तदनु समारब्धोनृत्यमहोत्सवः। मेघ-नीलाभमालातः अवतरन्ती कनकश्रीरिव चिन्तामणिर्मृदुलांगनर्तनै विविधाभिनय-भंगिमाः प्रस्तुतवती। प्रतीयते स्म सा तदानीं नृत्यशास्त्र-सावित्रीरिव साक्षात्।

ततश्च पुष्पाणि प्रवर्ष्य महन्तमहोदयेन तत्कलाः प्रशंशिताः। समस्तदर्शकैरपि समर्थन स्वरोद्घोषैरलंकृता चिन्तामणिः। नृत्यावसाने शुभाशिषो विकीर्य महन्तमहाभागो यदा प्रस्थितुं प्रचक्रमे, तदैव केनचिद् बिल्वमुद्दिश्य कर्णे जजाप—"पंडितपुत्रोऽयं तथा-कथितः।"

–वितृष्णया हेयदृष्ट्या च विलोकयन्नुवाच महन्तमहाराजः—"नीचोऽस्ति नितराम्"।

–एतदसहमानेन बिल्वेन भणितम्—"अधुनाऽभवम् श्रेष्ठः"।

–साश्चर्यं कश्चिन्नागरिकोऽपृच्छत्–"कथं तावत् ?"

–"महन्त-पदार्पणाय सर्वा वसतिरियं पुनीता चेत्कथं नाऽहं पुनीतः। अद्य तु सर्वोऽत्यत्रः पवित्रः"—व्यंग्येनोवाच बिल्वः।

–"घृणिताऽचरणस्त्वम्"—सरोषमवोचत् मठाधिपः।

–घृणामात्रं भवद् दृष्ट्याम् ?

–प्रमत्तस्त्वम्।

–किन्तु नाऽहं मिथ्याचारी भवादृशः। यो निशान्धकारे देवदासी-नृत्येन नयनामोदं लिप्सति, दिवा च धर्मदम्भमुद्घोषते।

–मूर्ख ! पापस्त्वम्। नगरनिवासाधिकाराद् वंचितश्चापि मां पंकिलयति ?

–न त्वं देवता।

–"ताड़य नराधमम्"—साक्रोशमादिष्टं मठाधिपेन। तत्समर्थकाः सत्वरं प्रहृत्य ताड़ितवन्तः। बिल्वोऽभियोक्तुं नाऽचेष्टत, जड़वत् ताड़नामसहत। मुखात् निःसृता रक्तधारा, परं केनापि बिल्वरक्षार्थं स्वपदं नाग्रे सारितम्।

अथ च चिन्तामणिरसहमाना द्रुतमभिगत्य बिल्वोपरि निजकायामाच्छादित-वती। सहसा निरुद्धाः प्रहारकैर्हस्ताः। क्रूरदृष्ट्या विलोकितं महन्ताख्येन साटोपं गर्जयताऽदिष्टम् च—"चिन्तामणे ! दूरमपसर"।

–संशयाकुला साऽवोचत्—"महोत्सवसमये अमंगलमिदम् ?"

–कथमत्रमामंत्रितोऽयम् ?

–नात्र भेदभावभित्तिः।

–एतादृशनीचस्य भवनेऽस्मिन् प्रवेशः ?

–महाराज ! अत्राऽगन्तुकः सर्व एवोत्तमो भवति ।

–व्यर्थं पक्षपातिनी नीचेऽस्मिन् ।

–मानवतां केवलं समर्थयामि ।

–दानवोऽयम् ।

–पुनरपि दया भवद्धर्मः ।

–शिक्षसि माम् ?

–नहि; रक्षाभिक्षां याचे ।

–चिन्तामणे ! पंकिलकीटोऽयं नीचः, एतद्रक्षामिषेण विषं वर्धसे ।

–प्रार्थनेयं मदीया ।

–सहसा बिल्वोऽप्यवोचत्—"नैवं देवि ! मदर्थं याचना नाचरणीया । निर्वहतु धर्ममयं धर्माधिपंमन्यमानः ।

–"निष्कासय दूरमेनम्"—इति कथयतः कंपितं स्वरं धर्माधिपस्य ।

–अतिथिरयम् ।

–चेद् वयम् ?

–देवताः ।

–यद्ययमत्र शरणमाऽप्स्यत्, तर्हि नाऽभविष्यन् सुष्ठु परिणामाः ।

–के दुष्परिणामाः वेश्यायाः कृते ?

–न भविष्यति त्वत्सम्बन्धो मन्दिरेण सह"—विभीषयन्नुवाच साक्रोशं महन्तः ।

–मन्दिरेण न स्यात्, देवतया सम्बद्धा तु भविष्यामि ? विश्वासपूरितं स्वसंकल्पमुद्घोषितवती चिन्तामणिः ।

एतत्कथनेन स्वापमानं मन्यमानो मठाधिपः क्रूर-दृष्ट्या पदानि प्रक्षिपन् स्वसमर्थकैः सार्धं प्रासादात् निर्गतवान् । नागरिकैः प्रशंसितश्चिन्तामणेरुत्साहः । ततश्च सर्वे बिल्वं प्रति सहानुभूतिं प्रदर्शन्तः प्रस्थितवन्तः ।

अथ च चिन्तामणिमुद्दिश्य बिल्वोऽवोचत्—

–देवि ! क्षम्यताम् ! मत्कारणाद-नावश्यकविघ्नोऽपस्थितस्त्वन्नमहोत्सवे ।

–बिल्व ! अतिथिस्त्वम् । अतिथेरवमानना भगवदवहेलनैव ।

–अपराधस्तु मामकः ।

–नैव, नापराद्धं त्वया किंचित् ।

–अधुनाऽनुकम्पितस्त्वयाऽहम् ।

–स्वात्मा रक्षितो मया तु ।

–कथमेतत् ?

–यतोहि सत्यावावाम् ।

–ज्योत्स्नेव प्रसृता बिल्वमुखे, स्फूर्तिरिवोदिताऽधरे । विश्वास-सरोवर मिवाऽपश्यत् चिन्तामणिनययनोर्बिल्वः ।निजाऽवेगं संयमन्नवोचत्—"सकलनगरं मत्तो जुगुप्सते" ।

–त्वं तु न जुगुप्सते कस्मात् ?

–स्निह्यामि घृणामूर्तौ ।

–तावत् सुनिश्चितो त्वद्-विजयः ।

–देवि ! प्रतिपलमभिसंदधति समाजमेते दम्भिनः, स्वात्मनश्च धर्मप्राणान् विज्ञापयन्ति ।

–एतदर्थं जन्म तेषाम् ।

–मज्जन्म चेत् ?

–निजभागधेयं पृच्छ ।

–जड़ताऽत्र केवलम् ।

बिल्व ! त्वं जीवनसत्यम्, गतिसौन्दर्यम्, संगीतमाधुर्यञ्चासि यत्किंचिदाचरसि, विचारयसि वा, तत्सर्वं सत्यम्, तदर्थमेवाभवत् त्वज्जन्म । विगतजन्मनि यदवशिष्ट-मासीत्—तस्यैव पूर्तिरनिवार्याऽस्मिन् वर्तमान जन्मनि ।

–प्रचुरं पिपासुरहम् ।

–पिपसैव जीवनम् ।

–निर्वाणमेष्यति कदाचित् ?

–न शमेति कदापि पिपासा ।

–न जाने, कथमद्य विश्वासः प्रसूतः ?

–इयमपि भ्रान्तिः । विश्वासस्तु शाश्वतः; जातुचिदनुभूतिर्भवत्यस्य ।

–चिन्तामणे ! मत्साहचर्यं निर्वक्ष्यसि ?

–कियान् भावुकस्त्वम् ? नाऽत्र कश्चित् कस्यापि सततं सहचरः, पुनश्चाहं वेश्या, कथमत्र साहचर्यप्रश्नावकाशः ?

–मैवं भण ।

–एतदेव विधानमस्मज्जगति ।

–संजातो नितान्तमहमेकाकी ।

–मुक्तचिन्तने विश्वसिषि, मुक्तस्य च साहचर्यं कथं सम्भवेत् ? साहचर्याभिप्रायस्तु बन्धनम्, बन्धन-स्वीकरणाच्च पराजयं मन्यसे । कथमद्य विमूढोऽसि ?

–नहि, देवि ! क्षणं यावत् तिमिराक्रान्तोस्मि, बन्धनं तु नैव स्वीकार्यम् ।

–स्वकीय-दुकुलाञ्चलेन बिल्वाऽधरात् स्रवितरक्तं प्रोञ्छन्ती जगाद चिन्तामणि—"एषोऽपि संयोगः" ।

–केवलं विलोकयन् अवर्तत बिल्वः ।

–अतिथे ! निवेदनमेकम् ।

–आदिश देवि !

–निवर्तस्व ।

–नैतत्संभवम् ।

–अग्रे प्रचुरक्षतेराशंका ।

–एकाकी तावदग्रेसरो भविष्यामि ।

–कठिनेयं यात्रा; असहायः पथिकः श्रान्तःक्लान्तश्च जायते ।

–श्रान्तिस्तु विश्रामः, न तु यात्रासमाप्तिः ।

–विश्रामपीडा चाऽसह्या ।

–सानन्दं सहिष्ये ।

–सविस्मयं विलोकयन्त्याश्चिन्तामणेर्मुखं स्मितहासभासितम् ।

–अहमपि किंचित् जिगदिषुः ।

–निःशंकमुच्यताम् ।

–भोगो नैव जीवनधर्मः ?

–अनिवार्यता जीवनस्य ।

—तत्पुनः कथं व्यभिचारो मन्यते मुक्तभोगः ?

—असंमतभोगो व्यभिचारः ।

—अस्मिन् वसतिसमाजे संभविष्यति काचिदसंमतिः ?

—विपणोऽयं, नाऽत्र प्रश्नावकाशस्तदर्थम् ।

—पुनरपि कथ्यते नीचोऽहम् ।

—सामाजिकमूल्यस्य प्रश्नोऽयम् ।

—देवि ! नेयं वसतिः समाजेतरा, अभिन्नागरुपेयं समाजस्य ।

—नायं प्रश्नश्चरित्रस्य, अपितु आत्मिकशान्तेरस्ति ।

—यावत् तनोस्तपनं नैव शमेति, तावन्मनोदौर्लभ्यमपि विजृम्भते ।

—मनोज्वारादेव तनुतापो विकलयति ।

—मिथ्या-दर्शने नैव विश्वसिमि, प्रत्यक्षपक्षपाती चाहं स्थूलजगति जीवामि ।

—लक्ष्याद्-दूरतरोऽसि ।

—लक्ष्यं तु प्राप्तम् मया ।

—कुत्र तावत् ?

—इहत्र, केवलं त्वम् ।

—सहजं सस्मिता चिन्तामणिर्बिल्वाभिमुखीभूय जगाद—

—इयान् सरलः पन्था ?

—किमपि प्राप्स्यामि नहिं जीवने, केवलं त्वत्प्रेमविसुधो जगद् विस्मरिष्यामि । विश्वसिहि चिन्तामणे ! अतः परं नैषणा मदीया ।

—किन्तु नाहं समर्था किंचिद् दातुम् ।

—सर्वमस्ति त्वत्समीपे ।

—उच्छिष्टादतिरिक्तं किमस्ति ?

—अत्रापि पूरितं पीयूषम् ।

—मुग्ध-युवक ! विषमेव मन्यसेऽमृतं भ्रान्त्या । कथं त्वां बोधयानि ?

—मत्प्रस्तावं नैव तिरस्करिष्यसि ।

—एकपक्षीयोऽयं प्रस्तावः .....; अतः परं किंचिद्वक्तुं नाऽपारयत् सा, बिल्वाधरे प्रसृतं रक्तं चांऽगुलिपर्वात् प्रोच्छितवती ।

–प्रत्युत्तर माम् ।

–बिल्व ! बन्धने स्थातुं नैव पारयामि ।

–पूर्णतः स्वायत्ताऽसि मत्तः ।

–सहमता भवितुमक्षमाऽहम् ।

–त्वमपि विगर्हा-भीता ?

–पूर्वं विगर्हिताया: कृते का भीतिः ?

–तत्कथं संकोचमावहसि ?

–किमपि नोत्तरितं चिन्तामणिना स्वांगुलिपर्वेण च बिल्वकपोले शनैः प्रहारितम् ।

–"प्राप्तलक्ष्योऽपि तद्वंचितः"—शनैरभमणद् बिल्वः ।

–कियान् निर्लज्जोऽसि ? इति कथयन्ती तिर्यग्नयना समुत्थाय स्वकक्षं प्रस्थिता चिन्तामणिः ।

बिल्वमनसि तरंगिताश्च संगीतस्वराः । स्वच्छन्दविहगवत् चुकूजोच्चैः पुनः पुनर्बिल्वः ।

\+ \+ \+

६

सुदूरं प्रथिता चर्चा चिन्तामणिसौन्दर्यस्य लास्यविलासस्य च । नैके सम्पन्नाः कलाविशारदाश्च सततमभवन्नभ्यागतास्तद्-द्वारस्य । नाविकानां व्यवसायो विस्तृतः, परं वसतिसमाजे प्रसृतेर्ष्या । कैश्चित्तु चिन्तामणिं क्रेतुं प्रस्तावितं, किन्तु स्वायत्तैवाऽवर्तत नर्तकी । बिल्वेन सह दृढ़तरोऽभूत् प्रतिदिनं तत्संबन्धः । मुक्तभोगस्य पक्षपाती बिल्वः शनैः-शनैस्तदनुबंधितोऽभवत् । वारांगनावसत्यां साम्प्रतमेकेनैव निकेतनेन सम्बद्धो बिल्वो नाऽन्यत्र प्रयाति स्म । चिन्तामणिरपि तद्-दर्शं नाकुलाऽवर्तत । यदि कारणवशाद् विलम्बतेस्म बिल्वश्चेत् पारे-नदीं नयनदूतीं प्रेषितवती गवाक्षात् । कदाचित्तु नाविकमाहूय बिल्वकुशलं पप्रच्छ, जातुचित् देवतासमुखासीना स्वदेवताक्षेमाय प्रार्थयमानाऽवर्तत । अथ च-बिल्वे समागते तन्नयनयोः पाटलपुष्पाणीव विकसितान्यभवन् । प्रस्पन्दिते चाभवतां भुजलते तदालिंगनाय ।

पुराऽभूदप्रसन्नो मन्दिराधिपो बिल्वव्यवहाराद् । स एवाऽधुना देवदासी पदायाऽर्पयितुं प्रस्तावं प्रेषितवान् चिन्तामणिसकाशे । किन्तु सहजभावेनाऽस्वीकृतं चिन्तामणिना । अपारसम्पत्तिमूलं लोभपाशमपि विस्तारितं मठाधिपेन, परं कस्मादपि लोभाद् लाभाद् वा बिल्वमपहाय महन्तचक्व्यूहे नाऽपतिता सा । बिल्वोऽपि तत्रैव सर्वस्वसुखमनुभूयानो भगवद्भक्तिविसुधः सेवक इव संसारमुपेक्ष्य चिन्तामणि-प्रेम्णि विमोहितः सर्वं विस्मृतवान् । बिल्वस्य जीवनसर्वस्वाऽसीत्सा चिन्तामणिरेव, शेष-संसारस्तु निःसारः । विक्षुब्धं नगरं तस्मात् । विविधाः आलोचनाधूमाः विस्तृताः, परं नैतस्य मलिनीजातं मानसचक्षुः । सर्वमुपेक्ष्य भोगनिमज्जितः स कस्यापि विगर्हणं वाणीं नाऽशृणोत् । चरमसीमामतिक्रान्ता तस्य भोगवृत्तिः । कुलजनसदस्याः नितरां चिन्तिताः यथासमयं विबोधयन्ति स्म, परं सर्वान्नुपेक्ष्य मूर्खांश्च घोषयन् पारे-नदीं प्रापत् । सर्वे कुटुम्बिनस्तं प्रमत्तं नरक-कीटं च कथयन्तस्तिरस्कुर्वन्ति स्म, परं सः सर्वान् मूर्खानेवाऽमन्यत ।

चिन्तामणिसभायामुपविश्य तन्नृत्येनाऽनन्दितः मनस्येव कलादेवीं तां सम्मानितवान् । प्रयातेषु सर्वदर्शकेषु चिन्तामणिकक्षं प्रविश्य स्वकरैस्तच्छृंगारमरचयत् ।

एकदा पप्रच्छ चिन्तामणिः—"अतीव रोचते तुभ्यं शृङ्गारः" ।

—देवि ! त्वदीयतनुसंसर्गाद् शृङ्गारोऽपि सुशोभते, शृङ्गारितोऽतितरां विभाति रूपम् ।

—रूप-सौन्दर्यसाधकस्त्वम् ?

—केवलं नाहम्, समस्तसंसारः शतं समाः सौन्दर्यान्वेषणे भ्रमितः ।

—तस्मादेव नाऽवाप्तं लक्ष्यमद्यावधि ।

—सौन्दर्यगवेषणा नैव भ्रान्तिः ।

—बाह्यसौन्दर्यं तु नश्वरम्, एतत्प्रति व्यामोहः भ्रान्तिमात्रम् ।

—आन्तरिकसौन्दर्यसत्ता त्वप्रत्यक्षा, तद्गवेषणा नितरां मूर्खता ।

—मदीयदेहे स्निह्यसि, न तु मयि ।

—यदि तनुसत्ता नाऽभविष्यत् तर्हि क्वाऽधारो मनसः, मोहस्य, आकर्षणस्य वा । तनुरेव प्रत्यक्षसत्यम्, त्वद्-द्वारमागन्तुकाः सर्वे अस्मादेव सत्यदर्शनात् प्रशंसन्ति, सौन्दर्यनिधिं च त्वां भणन्ति ।

—यदेदृशं तनुसौन्दर्यं न वर्तिष्यते चेत्—?

–एकोऽपि नाऽयास्यति त्वद्द्वारे, तदानीमन्यवारांगनावत् कृत्रिमप्रसाधनैरापण संचालनाय मिथ्याकर्षणं आपादनीयं भविष्यति ।

–चेन्मत्कलाप्रतिष्ठा ?

–देवि ! नात्र कोऽपि कलापरीक्षकः । देहसौन्दर्यवशादेव त्वत्कलाः आद्रियन्ते । विध्वंसय कलाभ्रमम् । जीवनाय कलाया उपादेयता, न तु कलायै जीवनम् । यद्यपि मधुरं तव दर्शनं, परं सौन्दर्यदर्शनाभावे कलापि केवलं जड़तामेष्यति ।

अपि जीवसि त्वमप्येतदर्थम् ?

–नाऽहं कला-परीक्षकः, भोगवादी चाहम्. इयानेव सम्बन्धो भोगस्य कलया सहना न्यः तस्माच्छौन्दर्यसत्ता अधिकं मृदुलायते । मत्कृते त्वदीयसौन्दर्यमेव सत्यम् ।

–मद्-रूपं विकृतायते कदाचिच्चेत् ?

–अतृप्तो वर्तित्यते मदीयभोगः ।

–स्वार्थी त्वम् ।

–नहि देवि ! स्पष्टं मदीयलक्ष्यम्, नेयं प्रवंचना ।

–मां स्वकीयां मन्यसे ?

–'आम्'—सहजमवोचद् बिल्वः ।

–कोऽधिकारस्तव ?

–नासीदुत्तरं बिल्वमुखे, केवलं तस्याः नयनयोः स्वबिम्बं विलोचितवान् ।

–किं चिन्तयसि ?

–अधिकार-सामर्थ्यप्रश्नम् ।

–व्यर्थं खिद्यसे ।

–आम्, सम्यक् जानामि यत्-स्वर्णमुद्राभिरपि तोलयित्वा त्वन्मानसं विचालयितुं न पार्यते । त्वामेव तस्मात् पिपृक्षामि यत्-शक्नोषि मां बिना जीवितुम् ?

–नैव ।

–कथम् ?

अज्ञातेयं हृदयस्यास्था ।

–स्वात्मानं विमोहयसि ?

–बिल्व ! मदीयास्थां भ्रान्तिं भणसि ? भ्रमेऽस्मिन्नेव सुखमावहामि नितराम् । ज्ञातं प्रति नैव वर्तते जिज्ञासा, अज्ञातान्वेषणाय च या विकलता मथ्नाति हृदयम्, स एवानन्दः ।

–मया तु प्राप्यते यावान्नानन्दस्त्वदीयसुरभितमृदुलदेहस्पर्शे, तावान्नान्यत्र संसारे ! यदा त्वदीयगभीरनयनयोर्जलदर्पणीधरातले चंचलमृगशावककेलिं विलोकयामि तदानीं मदीयविग्रहे भावहरिणाः उदग्रप्लवनैः प्रयान्ति । पीयूषपूरितं च तवाऽधरं निपीयमानोऽहं नितरां प्रमत्तो विस्मरामि संसार-विभीषिकाम् ! पेलवभुजापाशेनाऽश्लिष्टश्च स्वात्मानमपि विस्मरामि, अतुलनीयतृप्तिमनुभवामीति सत्यम् ।

–तृप्तिरेव त्वदीयलक्ष्यम् ।

–किन्तु तृप्तिरियं प्रतिदिनं नवविकलतां प्रसूयते, अतृप्तञ्चानुभवामि पुनस्तदानीं । कीदृशीयं विडम्बना ? तृप्तेरनन्तरं पुनरतृप्तिर्निरन्तरा ।

–नावाऽप्तुं शक्यते त्वया तृप्तिः ।

–इच्छाम्येव न ।

–कथम् ?

–तृप्तिर्जीवनसमाप्तिः ।

–आजीवनं मां सहचरीं विधातु शक्ष्यसि ?

–बन्धनं विहाय ।

–आत्मबन्धनं सांसारिकबन्धनाद् भिन्नम् ।

–कंचिदपि बन्धनं स्वीकर्तुं न पारयामि । मुक्तवातावरणे जीविष्यामि । बन्धनं मृत्युः, जड़ता, जीवननिष्क्रियता च ।

–मुक्तापि बन्धने जीवामि । स्वेच्छया जीवितुं न पारयामि, स्वात्मार्थं नैव, अपितु परार्थं जीवामि अहर्निशम् । सदा समागतदर्शकानां कृते करणीयमेव नृत्यं मया ।

–नृत्यं त्वद्व्यवसायः ।

–नाहं जाने, को लाभोऽत्र व्यवसाये, केवलं हानिः प्रतीयते ।

–केनापि संबद्धा जीवनं यापय ।

–असम्भवमेतत् ।

–काऽपत्तिस्तत्र ?

–जन्म नैव बन्धनाय, अपितु प्रायश्चिताय ।

–एतदपि पुण्यफलम् ।

–वेश्यावेश्मनि जन्मापि पुण्यम् ?

–समस्तबन्धनमुक्तिरेव पुण्यफलम् । देवि ! वसतिरियं तप्त-पीड़ित-तृषित जनाय शान्तिदायिनी, तस्माद् गौरवमया ।

–"गमिष्यामि वसतिं विहाय"–परीक्षणमूलमाविष्कृतवती प्रश्नं चिन्तामणिः ।

–कुत्र यास्यसि ?

–न जाने ।

–मामपि सार्धं नय तावत् ।

–कियद्दूरं सहचरिष्यसि ?

–यावत्-त्वदीय सत्यमाकर्षयिष्यति माम् ।

–बिल्व ! जीवन-सार्थक्यं जानीहि ।गार्हस्थ्यं स्वीकृत्य सुखेन जीवनं यापय ।

–को लाभोऽत्र ।

–अधिकारं प्राप्स्यसि ।

–नेच्छामि तादृशमधिकारम् ।

–कर्तव्यं ज्ञास्यसि तत्र । अत्रत्य संसारोऽयं भ्रमः । एकदा पश्चात्तापं करिष्यसि । पंकिलता, वितृष्णा चात्र केवलम् ।—इति कथयन्ती चिन्तामणिः स्वकीयवातावरणं घृणितदृष्ट्या विलोकितवती । उद्विग्ना चाभूत्सा । तिमिराच्छन्ने तदीयनयने ।

–मलेऽस्मिन् अपि कमलायमाना त्वं तु—कथयता बिल्वेन भुजालिंगिता चिन्तामणिः ।

–बिल्व ! अलं तावत्, मोहजाले मां मा वलय ।

–किमद्य विरसा ?

–भीतमनाऽहम् ।

–त्वया सह सततं बलाद् वलयितां स्वात्मानमनुभवामि, कदाचित् लक्ष्य-भ्रष्टौ न भवेव आवाम् ।

–प्रतीयते यत् मठाधिपेन विमोहिता ।

—ममातिथे ! नेदृशं किंचित्, त्वदर्थं सर्वैःसंघर्षितुं पारयामि, सर्वं त्यक्तुं समर्था, परं स्वधर्मविसर्जनं नैवोचितम् ।

—न भविष्यामि कदापि बाधकस्त्वदीयधर्मपथे ।

—नारी चाहम्,

सकृत्समर्पिता यस्मै, नारी तस्मै सदाबलिः
विहायैषा निजं सौख्यं, तत्प्रसादाय तप्स्यति

स्वकीयसमस्तलक्ष्यान् विस्मृत्य नारी स्वदेवतासौख्याय स्वकीयसत्तामपि विलोपयति । अहं तु तस्यां जातौ प्रसूता, यत्र सीमन्ते कुंकुमपूर्तेरधिकारः, परं तस्मिन् कुंकुमे कस्यापि हस्ताक्षरस्य नाधिकारः । सततं भोग्याः वयम्, किन्तु भोगोऽयं युगदृष्ट्यां घृणामात्रं, कोऽर्थस्तादृशभोगाय जीवनस्य ?

—भोगो जीवनस्यानिवार्यता ।

—मर्यादायाम् ।

—उन्मुक्तभोगस्यानन्दमनुभवितुं न शक्नोति समाजः ।

—पशुतेयं केवलम् ।

—किमपि कथय, परं प्रकृतभोगे एवं वर्तते वास्तविक-सुखं यदा नदीजलपाने, वृक्षफलास्वादने, तरुच्छायोपवेशने श्वासोच्छासे च सर्वेषां समानाधिकारस्तदानीं नारी-भोगे कथं बन्धनम् ? स्वार्थपरतेयं धूर्तानाम् ।

—अतिथे ! भोगात्कदापि तृप्तिर्नैव संभवा । तृप्तेःसोपानं प्रेम, प्रेमातपात् भोगकालिमा विध्वंस्यते । प्रेमैव जीवनम् । तत्तपस्यायां वास्तविकानन्दः ।

—सौन्दर्यप्रेमी चाहं केवलम् । कल्पनासंसारे भ्रमितुं न पारयामि ।

मृदुलांगुलिकेलिविलासैर्बिल्वकेशान् नर्तयन्ती चिन्तामणिर्विश्वास-सागरे निमज्जिता, देहलतिका च भावनान्दोलिता सकम्पिताभूत् । तदानीमेव बिल्वस्तच्चिबुकं निजांगुलिना समुद्धरन्नुवाच—"चिन्ते ! नदीतटे चलावः" ।

स्वीकृतिसूचकं शिरःकम्पितं तया । निशीथवेलायां कृष्णा-कंचनसिकतायां ज्योत्स्ना-स्नातौ तौ परस्पर-पूरकौ अभूताम् । स्वजीवनलक्ष्यप्राप्तये प्रयततो प्रधावतो विल्वस्योरः निःश्वासप्रकम्पितमभूत्, परं पुनरतृप्तिर्विजृम्भिता । चिन्तामणिश्च निजभाग्यं प्रशंसन्ती धन्या संजाता । पारे-नदीं मंदिर-शिखरावलंबितं आशाशदीपं निर्लज्जभावेन मनस्येव तदाचरणं समीक्षितवान् ।

बिल्वेन कथितम्—चिन्ते ! पश्यसि मुक्तवातावरणम् ? मुक्तजीवने यावान्नानन्दस्तावान्नान्यत्र ।

—किन्तु कथमहमुक्ता ? समाजबन्धिता चाहं, एकदा सांस्कृतिकशृंखलायामेव विघटिता भविष्यामि ।

—तावत्पुनः माद्दशीभूयाः । स्वेच्छया संसारभोगान् अनुभव ।

—महदन्तरं आवयोः । पुरुषस्त्वं, नारी चाहम् । मुक्तोपि त्वं समाजे प्रतिष्ठाधिकारी, शतं शृंखलायिता चाहं मुक्तये चिन्तयितुमपि न पारयामि । सर्वेषामधिकारो मयि, किन्तु न मम कस्मिन्नपि । एतस्मादेव कथ्यते पतिता ।

—दृष्टेरन्तरमिदम् । युगदृष्ट्यपेक्षया आत्मदृष्टेरर्थं जानीहि, हीनभावनां मा जनय, दैन्यानुभूतिरेव जीवनबाधका ! स्वात्मानं पुनीतां प्रतिष्ठितां चावेहि । स्वाधिकारं प्रति जागृहि । कियती त्वं भाग्यशालिनी ? समस्तसंसारस्त्वदीयः । राज्यसिंहसनानि, धर्मासनानि, सर्वजनमानसानि च त्वच्चरणयोरवनतानि जायन्ते । प्रकृतिस्त्वम्, प्रत्येकपुरुषे तवाधिकारः ।

—"अधिकारः क्व ? नात्र कस्यापि कस्मिन्नपि वांछिताधिकारः"—कथयन्ती जहास सा । तत्स्वरसंगिन्यो वीचायश्चापि अट्टं अहसन् । वितृष्णा विस्तृता चिन्तामणिमुखे । अहमिका च विदलिता नयनयोः ।

—पराजयगीतिं पठसि ?

—नैवं प्रिय !

—चिन्तामणे ! धन्यासि । विषपानाय त्वज्जन्म । समाजस्थ नरकीटान् अमृतं वितीर्य स्वयं विषमश्नुते सततम्, पुनरपि त्वदीयसौन्दर्ये विकृतिर्नोदेति । यथा प्रकृतिः सर्वस्वापहृतेऽपि संसारप्रहारान् सहमाना मुक्तहासेन प्रत्यूषं सदाभिनन्दति त्वमपि तथैव प्रत्येकसंन्ध्यायां स्वशरीरगन्धं वितीर्य अमरलतेव शोभसे । विस्मारयितुमक्षमस्तव कृतज्ञतां संसारः ।

—किन्तु नायं लक्ष्यप्राप्तेः पन्थाः ।

—मत्तो दुःखिताऽसि ?

—नहि, बिल्व ! त्वमेवाश्रयोऽधुना ।

—पुनरपि उद्विग्ना ?

–प्रिय! अनुभवामि यत् लक्ष्यात् स्खलिताऽहं शनैः त्वत्संबद्धा एव संजाता। मज्जन्म सरिद्वत् सततं प्रवहनीयम्, तटालिंगनम् प्राप्य नैव बन्धनीयम्। मा भूयास्त्वं मदीयसाधनामार्गे बाधकः कदाचित्।

–मत्तो बिभेषि ?

–भयं नैव, आशंका वर्तते। नैव भवति शिलानिर्मित नारीहृदयम्। यद्यपि वेश्याहं, तथापि नारी एवास्मि।

–वेश्यासंज्ञा तु जगन्निर्मिता। न त्वं वेश्या, अपितु प्रकृतिः।

–प्रकृत्यनुबन्धनं च पुरूषाय न रोचते।

–पूर्णस्वतन्त्रौ प्रकृति-पुरुषौ।

–किन्तु परस्परमनुबद्धुं नैव शक्नुतः ?

–चिन्तामणे ! बिल्वस्य लक्ष्यं नैव बन्धनम् अपितु भोगः। येन च मर्यादित मार्गमायत्तं, तेनैव जड़ताऽप्ता। यदि संसारेऽस्मिन् मार्ग-प्रतिरोधिता नाभविष्यत् तर्हि समाजेऽद्य विकृतिरेखा अपि नाभविष्यत्। न जातिवर्णविभेदाः अभविष्यन्, न च सम्प्रदायविसंगतयः। बन्धनमूला मानवजाति-भ्रष्टता।

–बन्धनं सांस्कृतिकमूल्यम्।

–संस्कृतिः सभ्यता चेति पुरातनगदमूले। आभ्यामेव विकृतिपूरितं मानव-जीवनं समाजवातावरणञ्च। आभ्यामेव जर्जरितं जीवनं। स्वार्थसिद्धये एव सभ्यता-व्याघ्रचर्मणाऽच्छादितः स्वात्मा मूर्खमानवेन। पशुस्तावत् स्वतन्त्रः कृत्रिमावरणैः मिथ्योपचारैश्च विमुक्तः। न तस्य मार्गे कश्चिदवरोधः। मानवादतिरिक्तेन केनापि संस्कृतिवितानं नाच्छादितं। धर्मेणैव मानवता भ्रमिमापतिता।

–बिल्व ! अत्रापि भ्रमितस्वम्। कस्या अपि सृष्टेः कृते नितान्तमनिवार्यं सांस्कृकिमूल्यम्। सभ्यता च चरमोत्कर्षः सृष्टिव्यवस्थायाः। एनां विहाय पशु-वज्जीवनं तु चेतनाशून्यं निरर्थकमेवास्ति।

–चिन्तामणे ! प्रतिक्षणमस्यामेव चिन्तायां निमग्ना वर्तसे ? नीरसप्रश्नेषु नैव मननीयं मया। लयं लास्यं चेहे, सौन्दर्यामृत-पिपासाऽत्र, स्वयं विस्मृत्य स्नेह निर्झरिणीं अन्वेषयामि सततत्। नास्ति मदीयसम्बन्धः कश्चित् समाजेन, धर्मेण, सभ्यतया संस्कृत्या च। आनन्दयात्रापथिकोऽहम्, त्वं चाऽमृतदेवी मुक्तहस्तं वितरसि सुखानन्दम्। नूपुर-क्वणितं झङ्कारय, ईदृशलास्यलयं प्रस्तावय, यस्मात् विद्युततिरपि विलज्जिता नभोजड़तां खण्डशः कृत्वा सागरे विलुप्येत।

–"मदीय प्रियतम!"—कथयन्ती चिन्तामणि-बिल्वोरसा परिरम्भमाणा मधुर स्पन्दनसोपानेष्वारूढा पुलकितरोमा चाऽजायत । मदिरेक्षणेऽर्धनिमीलिते, देहे चानन्दांकुराणि प्रसूतानि ।

–प्रिय! क्षणमिदं शाश्वत् स्थातुं न शक्यते किम् ?

–एकलयता विरामः ।

–अप्यस्मिन् क्षणेऽप्यसंतुष्टोऽसि ?

–चिन्ते! सन्तुष्टिरेव विसर्जनमूलम्! अहं त्वां प्राप्तुमीहे, न तु विसर्जनम् ।

–समर्पिताऽस्मि ।

–नाहमीहे समर्पणम् । समर्पणादधिकारो व्यभिचरितुं प्रवर्तते अहंकारोद्वेगात् ।

–प्रकृतिस्तु समर्पितैव भवति ।

–चिन्ते! समर्पणादस्तित्वं विलुप्यते । विनाऽस्तित्वं सर्वमेतत् निःसारम् ।

–प्रिय! किं रोचते तुभ्यं सभागृहे सर्वेषामग्रे मदीयनृत्यम् ?

–त्वयि एकधिकारं कदापि न वाञ्छामि ।

–केवलं तनुगन्धग्राहकोऽसि ।

–चिन्ते! यथेच्छं भण । बहुधा विज्ञापितं मया यत् देहभक्तौ य आनन्दो नासौ भावनायां क्वचित् । कथयसि मानसं "भगवानिति"—परं त्वन्मनसोऽपेक्षया मृदुलयौवनफेनायितायां देहसौन्दर्यच्छायायामुपविश्य त्वन्मधुररूपामृतमास्वादयामि सततम् ।

–अप्यस्मि अद्वितीयसुन्दरी ?

–मन्नयनयोः स्वप्रतिबिम्बं पश्य ।

–त्वनयनमाध्यमेनैव विलोकयिष्यामि संसारम् ।

–त्वदीयसौन्दर्यस्पन्दनैरेव स्पन्दिते मे नयने ।

–अहो भाग्यशालिनी कियती चाहम् ? अद्य निशाशेषयामाः सरित्तीरे वीचिलास्यसहितं यापयितव्याः ।

–चिन्ते! इदं नीलाभं नभः, संश्लिष्टा मेघावलिः, चपलाचपल-नर्तनं, कल-कल शब्दायिता सरित्, सघनवनश्रीश्यामलता च त्वच्छरीरसौन्दर्ये एव पश्यामि । नान्यत् त्वद्-भिन्नं किंचित् ।

–प्रिय! प्रकृतिरहं, प्रकृतिमया वा ?

–चिन्ते! प्रकृतेरुपासकोऽहम् तु। अभूद् भावतदरला चिन्तामणिः। साभिमानं ग्रीवा समुत्सारिता तया। सुरभि-धूपिता केशराशिर्नितम्बमण्डलमाचुम्बितवती। विजितविधौ तदानने सुधाकलशमिव विलुठितम्। प्रतीयन्ते स्म तदानीं केशराशयः, नागयुवतयो ननु पीयूषकण-लिप्सवोऽधरबिम्बं प्रतिसरन्ति वलयिताः। बिल्वमभिपश्यन्ती विमोहिताऽभूत्सा, तदानीं बिल्वांगुलिपर्वाण्यपि तन्मृदुलदेहे वासनाछन्दांसीव व्यलिखन्। एतदन्तरे केनचिद् ध्वनितं बिल्वनाम। खण्डितं द्वयोर्ध्यानम्। साक्रोशं पप्रच्छ बिल्वः।

–"असमयेऽस्मिन् कोऽयं मूर्खः ?

–क्षम्यताम्।

–नाविक !!! त्वम् ?

–आम् ! अहमेवाऽस्मि।

–अधुना कथम् ?

–संदेशो भवते।

–कथय।

–श्राद्धदिवसः श्वो भवत्पितुः। प्रातरेव तर्पणादिकं कृत्यं संपादनीयं भवता, तावदनिवार्या भवतामुपस्थितिः।

–तर्पणम्! मृतात्मानं प्रति श्रद्धा !— न प्रसत्स्यति पिता मदञ्जलितर्पणात् अपितु विसत्स्यतितराम्, तस्मात्को लाभस्तर्पणात्।

–विस्मरसि नितान्तम् पूर्वजेभ्योऽञ्जलिदानायैव भवति पुत्रजन्म।

–अतृप्त एव मरणमीहे,कस्तर्पयिष्यति मां पुनः ? नैषणाऽञ्जलिप्राप्तये मदीया। प्रेत्यापि पुनरस्यामेव वसत्यां भ्रमितुमिच्छामि। अत्रत्यसौन्दर्यं दास्यति तर्पणाञ्जलिर्मह्यम्, तृप्तो भविता मदात्मा रूपपानादासाम्।

–बिल्व! नगरं निवर्तस्व दिवसैकाय केवलम्। चिन्तामणिरपि समर्थितवती नाविकस्वरम्।

–मां दूरं संप्रेष्य प्रोषितप्रिया भविष्यसि।

–बिल्व ! कर्तव्यं प्रथमम्।

–नास्ति किंचन मदीयकर्तव्यं, धर्मश्च। भोगमात्रं मज्जीवनम्।

–वेश्यापि धर्ममावहति, कर्तव्यं निर्वहति च । त्वं तु.....।

–चिन्ते ! नाऽहं कस्यामपि श्रेण्याम् ।

–गन्तव्यमवश्यं त्वया ।

–अस्तु, गमिष्यामि ।

नाविकेन भणितम्—अधुनैव चलनीयम्, प्रातरेव संपादनीयानि सर्वकृत्यानि ।

–विवशोऽपश्यद् बिल्वश्चिन्तामणिमुखम्, अभवच्च गंभीरः ।

–प्रिय! अत्रैवाऽस्मि वसत्यां, विषादं मा गमय ।

–त्वमपि चल सार्धम् ।

–नहि,

–काऽपत्तिरत्र ?

–बिल्व ! सामाजिकप्रतिष्ठां विचारय । विस्मृतवान् त्वं स्वधर्मं, परं नाहं विचलिता स्वधर्मात्—इति कथयन्ती स्वनिवासाभिमुखी प्रतस्थे । क्षणं यावत् जड़ीभूतो बिल्वः प्रायात् नाविकसहायो नगरं प्रति ।

\+ \+ \+

१०

परिवारसहायो बिल्वो हरिकुण्डतीर्थमगात् । अनिच्छया स्नात्वा वृद्धकथनानुसारं सर्वकृत्यानि संपादितवान् । यज्ञोपवीतसूत्रमंगुष्ठवलयितं कृत्वा पवित्रजलांजलिपूर्वकं वैदिकमंत्रोच्चारणैः सह पूर्वजेभ्योऽददात् तर्पणम् । परिजनाः ऋचां सस्वरपाठे निमग्नाः आसन्, परं बिल्वोऽतिष्ठद् उद्विग्नः । एको वृद्ध उपगत्याऽवोचत्-"बिल्व! गोत्रोच्चारणं विधेहि ।

—"चिन्तामणिः"—मुखरितो ध्वनिस्तन्मुखात् ।

–वक्रीभूताः वृद्धभ्रुकुट्यः, क्रोधकम्पितश्चाधरः । क्रूरदृष्ट्या घूर्णयन्नुवाच—"पामर! कियान् पतितोऽसि? पापकीटोऽसि स्वयं तु, पितरमपि नरकपातनाय प्रयतसे ?

–विलोकितं नरकं कदाचिद् भवता ?

–समक्षं पश्यन्नस्मि ।

–दृष्टिदोषोऽयम् ।

–पशुस्त्वम्, नैच्छाम तवागमनं, किन्तु लोकाचारकारणद् विवशाः बाध्याश्चास्म ।

–कथं चकितो जायते चिन्तामणिनाम्ना ?

–धिक्, धिक् वेश्यानाम तत् ।

–क्वाऽधुना मदीयगोत्रम् ? येन धर्मो विसर्जितः किं तस्य गोत्रम्, का जातिः के च परिजनाः ?

–त्वं सर्वं त्यक्तुं शक्नोषि, किन्तु न वयं त्वद्विसर्जनसमर्थाः ।

–पापलिप्तं दुराचारिणमपि मां त्यक्तुंमक्षमः कुलपरिजनः ?

तर्हि ऋग्वत् पवित्रसौन्दर्येण ज्योतिष्मती तां देवीं त्यक्तुं कथमहं पारयामि ? कथं विस्मर्तुं शक्नोमि तन्नाम? सैव मदर्थं भागवतकथा, प्रत्यङ्गानि तस्याः रासपञ्चाध्यायी-श्लोकाश्च । सर्वे यूयं भक्तिवचितं मां चिकीर्षवः । परं नैतत्संभवम् ।

द्वयोर्विवादात् तत्रत्याः सर्वे कुटुम्बिनः खिन्ना अभवन्, एकोऽन्यो वृद्धः शान्तिस्थापनाय संकेतितवान् । अन्योऽपृच्छत् ।

–"वेश्याभक्तिसुलीनस्त्वम् ?"

–ग्रीवाऽवनत्या स्वीकृतं बिल्वेन ।

–निश्चलश्रद्धान्वितोऽसि तां प्रति ?

–तां विना जीवितुमक्षमोऽहम् ।

–किन्तु जुगुप्सते सा तु त्वत्तः ।

–मिथ्यैतत् ! सर्वथा मिथ्या ।

–बिल्व ! नाऽधुना एतत्सत्येन परिचितस्त्वम् । नास्ति श्रद्धास्पदा वेश्या, अपितु वासनाभस्त्रिका सा । धनलोलुपा यौवनं विक्रयते नित्यम् । साम्प्रतं कामान्धस्त्वं, सर्वस्वसमर्पणानन्तरं पश्चात्तापं करिष्यसि ।

–न तस्यामुदेष्यति घृणा कदाचित् ।

–घृणा तु विद्यते सर्वेषु, पुनश्च वेश्या तु घृणापर्याया, अपहृतसर्वस्वा साऽचरति घृणां तस्मिन्नेव सर्वस्वदातरि, एतस्मादेव सभ्यसमाजो जुगुप्सते तस्याः ।

—किन्तु हृदये स्थापयाम्यहं तु ताम्, तद्घृणां पातुमस्ति शक्तिर्मयि ।

—नाऽवगच्छसि साम्प्रतम् ।

—यदा भवन्तः स्वमार्गं परिवर्तितुमक्षमास्तदा कथमहं भविष्यामि स्वपथो विचलितः ?

—बिल्व! कथं विस्मरसि यत् त्वत्पूर्वजाः कियन्तः सात्विकाः, सदाचारिणश्च ब्राह्मणः आसन्, निजतपस्यया तैर्जगत्पुनीतम्; तत्कुलोत्पन्नश्चैकस्त्वं, यो निजाचरणैः कुलं, पूर्वजगणं ब्राह्मणजातिं च कलंकयसि ।

—नास्ति काचित् जातिर्मदीया ।

—अधमस्त्वम् ।

सर्वैः धिक्-कारितं बिल्वाचरणं, किन्तु नाऽभूत् परिवर्तनं तत्संल्पे । बहुधा कुतर्कयन् अपराह्णवेलापर्यन्तं तर्पणादिकं संपादितवान् सः । संध्यासमये समायोजिते विप्रभोजे कमपि भोज्यपेय पदार्थं नाऽस्पृशद् बिल्वः, यतोहि स्पष्टं परिचितोऽभूत् समाज-व्यवहारेण तद्-इष्टया च - यत् तत्स्पृष्टं नात्स्यति कोपि ।आसीत् गृहं परिजनसंकुलं परं बिल्वो मनसा नासीत् तत्रस्थः । नदीतारस्थे सुवदकल्पनालोके निमग्नः सः जन-समूहेऽपि सुतरामेकाकी एवाऽभूत् ।

संध्यातः पूर्वमेव सहसोत्थितम् तीव्रवातप्रभञ्जनम् । धूलितिमिरावृतं नभस्तलम्, सूर्यमुखमण्डले कालिमेव व्यलम्पित् । प्रागेव सूर्यास्तस्य कृष्णपक्षीया रात्रिरिवाऽप्रसृता । गगनं तर्जयन्तो भीमकायपिशाचा इव प्रचण्डमेघाः स्वाकारं वर्धयन्तो लोकान् व्यदधत् भयाकुलान् । भयवह्निना इव तड़ित्ततयश्चीत्कारमूचुः । तत्क्रन्दनैः द्विगुणितोत्साहाः कज्जलनीलकायाः बलाहका उच्चैरगर्जन् साट्टहासं वृष्टिप्रहारांश्च-प्राक्षिपन् । काष्ठवत्स्तब्धाः सर्वे जनाः जलकवलितं काष्ठाकुलं विलोकयन्तो बिभ्यतिस्म । अभवत् समस्तनगरं जलौघप्लावितम्-किन्तु बिल्वस्त्वासीद् विकलो गृहात् निर्गन्तुम् । समवयस्केन केनचित्कथितम्—

—बिल्व! नाद्य बहिर्गच्छेः ।

—कथम् ?

—सर्वे भणन्ति यत्—पितृश्राद्धदिवसे गृहे एव स्थातव्यम् ।

—कस्मात्पुनः ?

—अद्य नेदृक् समाचरणीयं, यस्मात् पितृणामात्मा कष्टायते ।

—मत्पीड़ां प्रति न कस्यापि सहानुभूतिः ?

–एकनक्तमपि स्थातुं नैव शक्नोषि ?

–नैव ।

–बिल्व ! नाद्य पारे गन्तुं शक्ष्यसि, वर्धमानो वेगान्नदीजलौघः । इतस्तु मन्दिर-सोपानानि जले निमग्नानि, उतश्च पारे न जाने, संजाता विषमा स्थितिः ।

–प्रतीक्षमाणा सा च माम् ।

–जानाति सापि साम्प्रतिकां स्थितिम् ।

–स्थातुमक्षमोऽहम् ।

–जहि, बिल्व ! मूर्खहठम् ।

–"मां नाऽवरोद्धुं क्षमः कोऽपि"—कथयन्निर्गतो बहिर्बिल्वः । सर्वेषां निवारणचेष्टाः विफलिताः । वर्षाप्रताड़ितोऽप्यार्द्रवसनः नदीं प्रत्ययात् । गहनान्धकारे पदे पदे संघृष्टप्रस्तरखण्डानि भूयोभूयस्तं सचेतयितुं प्रायतन्त, परं दृढ़संकल्पितः साधक इव निरन्तरमग्रेऽसरद् बिल्वः । जलौघेनाप्लाविता मन्दिरालिन्दभूमिरपि, पुरश्चासीद् गहनान्धकारसाम्राज्यम् । पारेऽपश्यद् ध्यानपूर्वकं, परं नाऽपारयद् द्रष्टुमन्धकारादतिरिक्तं किंचित् ।

नाविकमाह्वयद् बिल्वः । तदाह्वानमाकर्ण्य विस्मिताः सर्वे मन्दिरसोपानेषूपविष्टाः नाविकाः । चिरपरिचितश्च नाविकः उपागच्छन्नवदत्—"अद्यापि पारं यास्यसि ?

–अभूत्प्रचुरविलम्बः, सज्जीकुरु नावम् ।

–अप्यसि निरन्धः ?

–सर्वं तावत् पश्यामि ।

–किं पश्यसि ?

–पश्य, पारे प्रतीक्षते चिन्तामणिः ।

–प्रमत्तोऽसि ?

–नाविक ! माऽतियापय वेलाम् ।

–नास्ति नौका ।

–मृत्योर्बिभेषि ?

–प्रत्येकजीवितो बिभेति ।

–पारं प्रापय माम् ।

—किं न पश्यसि ? रोधोवृक्षाणामपि स्थितिं विचलिता। इयान् तीव्रः प्रवाहवेगो यत्-कस्मिन्नपि क्षणे तरणिर्विवर्तिष्यते।

—कथं त्वमपि परीक्षसे ?

—बिल्व ! नाद्यनिशायां पारं प्रापयितुं क्षमोऽहम्।

—नाविक ! पुरातनसम्बन्धरावयोः। किं मित्राय इयदपि न सहिष्यसे ? सहयोगं न प्रदास्यसि ?

—असमर्थोऽहम्।

—किं पुनर्वाञ्छसि ?

—मृत्योरावृतमृखाद् दूरीम्।

—मा चिन्तस्व।

—न त्वदीयचिन्ता। आत्मरक्षा तु विचारणीयैव।

—हताशो बिल्वो बहुधा नाविकमनुनयतिस्म, कृतज्ञतास्वरैरनेकधा याचितवान्, किन्तु नाविको न व्यचलत्। अथ चोपकर्णं जगाद—"स्वर्णमुद्रां दास्यामि।"

—स्वर्णादधिकं प्रियाः प्राणाः"—सहजमुत्तरितं नाविकेन।

—पंच स्वर्णमुद्राः दास्यामि।

—बिल्व ! स्वर्णमुद्रापेक्षया प्रियतरो मे परिवारः।

—नाविक ! विश्वसिहि, न भविष्यति काचित् क्षतिर्वेगविप्लवेन।

—एकनक्तं त्वदीयगमनाऽभावादपि न भविष्यन्ति विच्छिन्नास्तत्रत्य-सम्बन्धाः।

—कथमवेहि हृदयाऽवेगम् ?

—वास्तविक-स्थित्यां विश्वसिमि। कल्पनालोके नैव जीवामि।

—नाविक ! प्रापय पारम्।

—नितान्तमसमर्थोऽस्मि।

—विषमावसरेऽस्मिन् कियन्मूल्यं वाञ्छसि ? कथय, कियत्प्रचुरं पारश्रमिकं लिप्ससे ?

—कियद् दातुं शक्नोषि ?

—सर्वस्वम्।

—अत्यल्पमेतत्।

—समस्तनिकेतनम्, सर्वा सम्पत्, सर्वं चान्यत् त्वदीयं, एकनिशायां सद्यो नाशो दरिद्रतायाः, एतदधिकं नावाप्स्यसि जीवने कदाचिदुत्कर्षक्षणम् । अग्रेतर, नौकारज्जुं शिथिलय ।

—तुच्छराशौ जीवन-व्यवसायं न विधास्यामि ।

—नेष्यसि सम्पदाम् ?

—दारिद्र्येऽस्मिन् सन्तुष्यामि ।

—नाविक ! मूर्खतां त्यज, नाप्यन्ते पुनरीदृशावसराः, निशाऽद्यतनीया सौभाग्यदायिनी त्वदर्थम् । माऽपमानय लक्ष्मीम् ।

—बिल्व ? क्षम्यताम्, नाद्य साहाय्यमाचरिष्यामि ।

—बिल्वं परीक्षसे ?

—कथं न पश्यसि प्रवाहस्य प्रलयंकरवेगं, निशान्धतामसं च ? कीदृग् गर्जति

—जलधारा, नोत्सहे प्रबलवेगमभियोक्तुम् ।

—ईदृग्-वेगात् त्वं विभेषि, नाऽसौ बिल्वः । यास्याम्यहम् ।

—बिल्व ! व्यर्थं हठीयसि ।

—"मृत्योरालिंगनेऽप्यानन्दः, किन्तु साधनामार्गे मृत्युरपि दूरमपसरति, अवेहि चैतत्, एवं निगद्य प्रबल-प्रवाहवेगमुपहसन्नग्रे ससार बिल्वः ।

—बिल्व ! ध्रुवं प्रमादमाचरसि ।

—"स्वात्मानं चिन्तय"—प्रजल्पन् जलेऽवतरितवान् । कटिपर्यन्तं ववर्ध जलम् । प्रबलवेगविलोडनात् विचलितानि पदानि । प्रतिक्षणं प्रतीयते स्म ननु नभसि उच्छालयिष्यति प्रचण्डप्रवाहो देहम् । किन्तु साहस-सहायो बलादग्रे चचाल । येन सरिद्वेगेन सह पुरातनस्नेहिलसम्बन्धोऽवर्तत, स एवाधुनाऽभूत् नितान्तमपरिचितः । अथ च-मूर्धानमपि विघर्षितुमारेभे भूयसोत्तालजलौघः, तदानीं तरितुं प्रचक्रमे बिल्वः किन्तु प्रचण्डवेगवशात् श्वासग्रहणमपि कठिनमभूत् । भयाकुलश्च व्यचिन्तयत्—"चिन्तामणिसंगमं कदापि न प्राप्तुं शक्ष्यामि जीवने" ।

सहसा संघट्टितोऽसौ काष्ठतुल्येन भारयुतेन केनापि वस्तुना । नाऽपश्यत् निबिड़ान्धकारे किंचित्, किन्तु किंचित्साहाय्यमिव प्राप्तवान् तदालम्ब्य । तदाश्रितश्च सततमचेष्टत पारयितुं प्रवेगम् । दृढ़मालिंगितस्तद्वस्तुना बलात्तरितुं प्रायतत वेगात्तिर्यक् । बलवत्संघर्षानन्तरं यथा तथा प्रापत्तीरम् । दीर्घं निश्वस्य पंकिले तीरे

प्रासरत् शिथिलहस्तपादः । निमिलिताक्षो व्यचारयत्—"चिन्तामणिप्रेमप्रभावादेव जीवितोऽधुना, तस्मादेव प्राप्तवान्नहं प्रचण्डप्रवेगेऽपि किंचिदवलम्बनम्" ।

किंचिद् विश्रम्य जलौघफेनपंकिल एव प्रायात् प्रेयसीभवनम् । उपवन मप्यासीत् जलौघप्लावितम् । सत्वरं प्राप्य द्वारभूमिं कपाटफलके संकेतितवान् स्वागमनं कराग्रैः । ठक्-ठक्रूपो ध्वनिर्निविडान्धकारे प्रसृत्य पुनरागतो बिल्वकर्णयो-रेव! नामाह्वनमपि पुनः पुनरूद्घोषितवान् परं बहुधा प्रयत्नेऽपि कपाटोद्घाटनाय नाऽपारयत् । बिल्वस्य आशोत्पले तुषारमिवाऽपतत् यत्—"प्रतीक्षापि न विहिता चिन्तामणिना ?"

पौनःपुन्येन कपाटभित्तिं प्रताड़यन् सः तारस्वरेण चिन्तामणिनामाह्वानमु-दघोषितवान्- किन्तु नाऽभवत् गृहान्ते किंचित् संचालनम् । नासीदेषा आशा! विक्षोभ-व्यथितमना द्वारं धक्-कारितवान्, किन्तु नैराश्यमेवाप्तवान् । अन्ततो भवनस्य पृष्ठभागे समागतो वातायनं वीक्ष्य हताशोऽभवत् । आसीदत्युच्छ्रितं वातायनम् । व्यचिन्तयद् बिल्वो—"यदि पक्षी किलाऽभविष्यम् तर्हि समुड्डीय वातायनमार्गादन्ते प्राविक्षम्"! गहनान्धकारे चोर्ध्वगमनमार्गमार्गणतत्परः कुड्यमुपस्पृशन् इतस्ततो भ्रमितुमारेभे । किंचित्प्रयासानन्तरमाशाकिरणश्चकासे । उदीच्यकोण-गवाक्षाद् अवलम्बितं रेशमांशुकमिव स्पर्शादाभासत । आर्द्रताशोषणप्रयोजनाद् विस्तृतं सारि-काञ्चलमनुमीयमानो बिल्वस्तदालम्ब्य चोर्ध्वारोहणाय प्रायतत । दृढसंकल्पनिष्ठान्वितः प्राणी यदा प्रयतते, प्रकृतिरप्यजायत सहायिका स्वागततत्परा च, आपदाः स्वयमानमि-ताश्च भवन्ति ।

चिन्तामणिकक्षं प्रविश्याऽपश्यद् बिल्वोऽर्द्धनग्नां प्रागाढनिद्रितां मधुर-स्वप्न-निमज्जितामिव पर्यंके शयितां चिन्तामणिम् । स्वप्नानन्दरोमाञ्चितमुखे आसन् हासकोरकाणीव समुद्गतानि । अधरकम्पनमधुरं तदाननं निरीक्षमाणो बिल्वः शनैः शनैः पर्यंकमुपागमत् । मुग्धोऽभवत् निरीक्ष्याऽमितसौन्दर्यम् । नार्याः सहजसौन्दर्यमद्य प्रथमबारं विलोकितवान् सः । जागृता स्वाधर-पिपासा । चिन्तामणेरधरोत्पल-परिमलं निपीयमना स्वाधरौ चानमयत् । मृदुलपाटलवपुषि न्यस्तमिवाङ्गारमिति सहसा चीत्कारितवती भयोत्थिता साऽर्द्धवसना ।

—सपदि तदाधरं करेणाच्छादयन्नुवाच बिल्वः"बिल्वोऽहम्" ।

—भयविचलितनयना सा बिल्वं पश्यन्ती शनैराश्वसितुम् प्रायतत ।

—आश्चर्यं यद्-वेश्याऽप्येवं भवति विचलिता ।

–किं वेश्याप्रकृतिः सृष्टिप्रकृतितो विभिन्ना ? किन्तु कथय, निशीथवेलायां कस्मादत्र ?

–त्वां विना स्थातुं नाऽपारयम् ।

–एतस्मिन् निविडान्धकारे नद्याः प्रबलप्रवाहेणापि नाऽवरूद्धस्त्वम् ?

–चिन्ते! वास्तविकसाधकाय स्वतः प्रशस्ताः भवन्ति मार्गाः ।

–द्वारं त्वासीत् पिहितं, तत्कथं समागतोऽन्ते ?"— साश्चर्यं पृष्टवती चिन्ता-

–मणिः ।

–त्वमासीः प्रगाढनिद्रिता स्वप्नसौन्दर्यनिमज्जिता वा, प्रचुरं प्रयासितं मया द्वारोद्घाटनाय, परं क्रन्दनकवलितेऽस्मिन् वातावरणे स्वरेणैकेनापि सत्कारो न प्राप्तः! भवनपृष्ठभागादायातोऽस्मि ततः ।

–"पृष्ठभागात् ?"—साश्चर्यं भणितं तया ।

–आम्! सर्वथा सत्यमेतत् । त्वमपि निपुणासि, मत्प्रतीक्षा-श्रान्ता रेशमा-ञ्चलमवलम्बितवती गवाक्षात् ।

–"किं कथयसि ? रेशमाञ्चलम् ?"—इति गदन्ती ज्योतिःस्तम्भमादाय तदेव वातायनं प्रायात् सत्वरम् । गवाक्षप्रान्तं पश्यन्त्यास्तस्याः मुखान्निःसृतं चीत्कारं, भयातंकाच्च विस्तृतं वदनम् ।

–"किं घटितम् ?"—कथयन् करेण तत्स्कन्धं पस्पर्श ।

–पृष्ठेऽपसरन्ती विश्रृंखलस्वरेणाऽवोचत्सा—

स.....स.....स.....र्पः ।

अग्रे प्रसृत्य निरैक्षत बिल्वः—आसीद् वातायनलम्बितः कृष्णभुजंगः । तमेव रेशमवसनमवगम्य प्रासादोपरि समारुरोह । तं पश्यन् स्वयमपि भयात् त्रस्तोऽभवत् ।

–कियान् कामान्धस्त्वम् ?

–भ्रमितोऽभवम् ।

–भ्रमेण चानेन जीवनान्तोऽभविष्यत् चेत् ?

–"किन्तु साम्प्रतं तु कालजयी"—गर्वेण भणितं तेन ।

–बिल्वमदान्धतामालोचयन्ती प्रासादाद् बहिर्गन्तुं प्रतस्थे चिन्तामणिः । बिल्वो निवारयन्नुवाच—"बहिर्मा गच्छ" ।

–कस्मात् ?

–भवनाऽलिन्दमपि जलौघप्लावितम्, उद्यानभित्त्या संघर्षयन्ति भूयसोत्ताल-तरंगाः ।

–विलोचयामि यत्—त्वद्भ्रमेण किमाचरितमन्यत् ? कथमागतोऽसि पारे-नदीम् ? जलौघताण्डवं विमर्द्य कथं तरिता नदी ?

–विपत्तिविप्लवे काष्ठखण्डेनाऽप्ता सहायता । यदि तदाश्रयं न प्राप्स्यम्, तर्हि जीवने कदापि न पारयिष्यम् प्रबलप्रवाहम् । त्वन्मिलनाशयैव सहितो जले न्यमंक्ष्यम् ।

–आशंके खलु त्वत्कथने ।

–कदाचित्तु विश्वसिहि ।

ज्योतिस्तम्भं करे गृहीत्वा बहिरागता चिन्तामणिः बिल्वोऽपि तामन्वसरत् । झिल-मिलप्रकाशपरिवेशे प्राकार-प्रान्तमिंगितवान् बिल्वः—"चिन्ते ! उतःपश्य,अनेनैव निर्जीवकाष्ठेन ममाद्य साहाय्यमाचरितम्, परमबान्धवोऽयं मे ।

–उपगत्य निरीक्षमाणा चीत्कारस्वरेण भणितवती—"शवोऽयम्" ।

–सत्वरमुपेत्य बिल्वोऽप्यपश्यत् । ज्योतिस्तम्भप्रकाशे कश्चित् युवतीशवो प्राकारभित्तिसंघटितः स्वास्तित्वं ज्ञापयति स्म, उपहसितवांश्च बिल्वमदान्धताम् । शवस्य दुर्गन्धेन दूषितमभूत् तत्रत्यवातावरणम् । वायोरपि नासाऽवरुद्धा ननु तदानीम् । गौरवर्णा युवतीतनुः विपुलिता वायुविक्षोभात् । जलक्लिन्नं तदेव विग्रहं काष्ठ-विटपायितं बिल्वाय । विकृतिताण्डवेनाक्रान्तं तदाननं वीक्ष्य बिल्वश्चिन्तामणिरपि संत्रस्तौ ।

तद्-विकृतिदर्शनात् निवर्तमाना वितृष्णयाऽवोचत् चिन्तामणिः—

–अस्यैव सौन्दर्यस्योपासकस्त्वम् ।

–सौन्दर्यं तु सत्यम् ।

–"मूर्ख ! नैतत्सत्यम्, मिथ्या सर्वम् । इदं जीवनं मिथ्या, भोगोऽपि मिथ्या, त्वं मिथ्या, मिथ्या चाऽहम्"—उच्चैराक्रन्दितवती चिन्तामणिः ।

–हतप्रभ इव बिल्वः प्रासरत् प्रासादाभिमुखम् ।

–भ्रमे जीवसि नित्यम् । कियान्नभवः प्रमत्तः ? मिथ्यावस्तु सत्यमवगम्य भ्रान्त्या मृतशिशुवत् हृयेनाऽश्लिस्य भ्रमसि ।

–तावत् संसारोऽपि मिथ्या ?

–आम् ! आम् ! अथ किम्, संसारोऽपि मिथ्या, अहं मिथ्यास्मि ! मिथ्यास्मि !! मिथ्यास्मि !! तत्क्रन्दनं नीरव वातावरणे साट्टहासं गर्जितमभूत् ।

–"चिन्ते ! अवरुणद्धि क्रन्दनम्" । तीव्रं बभाण बिल्वः ।

–मोहवलयितस्त्वं कियान् प्रमत्तोऽभूः ? कस्यां स्थितौ च प्रापः ? मृत्योरालिंगितोऽपि न भयाक्रान्तः ? शवदुर्गन्धिनाऽपि नैव भ्रमितोऽसि ? समस्तास्थाः विसर्ज्य मांसाऽस्थिपुत्तलिकायै लुब्ध इवागच्छः ?

ओह ? इयत् प्रेम ! एषा साधना !! यदि अभविष्यद् ब्रह्म प्रति, तर्हि ध्रुवमेकलयता त्वदीया सत्येन साक्षाद् आकारयिष्यत् । क्षणभंगुरामिमां देहद्युतिं सौन्दर्यं मन्यसे ? चर्म-मार्दवं सत्यमवगम्य भ्रमसि ? इदमेव सत्यं किम् ?

–एवं कथयन्ती स्वनिशितनखाग्रैर्मुखत्वचं नोचयामास । सहसाऽनने रक्तरंजितरेखाभिर्मृदुलकपोल-भालचिबुकाक्षि-चर्माणि विदारितानि । एकस्मिन्नेव क्षणेऽभूद् विकृतं तत्सौन्दर्यम् ।

–हस्तौ नियम्य तां निवारयन्नवोचद् बिल्वः—"कथमात्मन्येव अन्यायमाचरसि ?"

–पश्य, यथार्थरूपं सत्यस्य ।

–चिन्तामणे ! अस्मिन्नेव भ्रमे जीवितुमिच्छामि ।

–कियान् पतितोऽसि ? सत्यस्य त्वमुपासकोऽपि वर्तसेऽनृतं प्रत्यास्थावान् ? विकृतिपंकिलतले कीटवत् पतितः सन् विषं निपीय धन्यंमन्यमानो जीवसि ? अतः परं त्वत्तोऽपि जुगुप्सा जाता ।

–चिन्ते ! मा मैवं कथय ।

–क्रुद्ध्यामि तव मूर्खतायै । स्वयं च दंदह्यमानाऽस्मि निरन्त-वितृष्णाग्नौ ।

–निजातुरतां जेतुं नाऽपारयम् ।

यस्मिन् सत्ये स्निह्यसि सदा, परमेतत् कियदसत्यम ? सत्यमवगम्यापि स्वार्थवशादसत्यं स्वीकर्तुमीहसे ? अद्यावधि त्वां जानामि स्म मुग्धयुवकम्, किन्तु वस्तुतस्त्वं स्वार्थिलः कामान्धश्च ।

तर्हि किमस्ति सत्यम् ?

—सहसा प्रभापुंजमिव प्रसृतं चिन्तामणिमुखे। संयतस्वरेणाऽवोचत्सा—"स्वान्ते निरीक्ष्यताम्, ज्ञानदृष्टि-प्रभां तत्तामसपर्यन्तं नयतु भवान्, यत्र त्वदीय आत्मानन्दः सत्यप्राप्तये चेखिद्यते। त्वदन्तः एव ब्रह्मस्वरूपं सत्यरूपेण विद्यते। सत्यसौन्दर्येण तेन सह भोगानन्दमाप्नुहि, तन्मयो भव, तस्मादेव परमसत्यस्य दर्शनं प्राप्स्यसि।

—तस्या मुखं निरीक्षितवान् बिल्वः।

—किं पश्यसि ? घृणास्पदं सर्वमत्र। गौरवर्णोऽयं विकृतो विदग्धश्च, चर्म वारूताऽपि शुष्कायते शनैः, पशुवत् प्रवहति मदन्तेऽपि रक्तधारा। मलमूत्रपूरिता विकृत-मांसपिण्डमात्राऽहम्। यदि मांसपिण्डाय प्रेमज्वार उत्तालयति त्वां तर्हि गच्छ ! बहिःस्थं तं शवमालिंग्य सत्यान्वेषण-मृगमरीचिकायां भ्रम।

—बिल्व ! नास्ति किंचिदन्तरं शव-मच्छरीरयोः।

—चिन्ते ? मा मां स्मारय शवविकृतिम्।

—"इयती घृणा ? पुनरपि जीवितशवरूपां मां प्रत्यास्थावान् वर्तसे ? सः शवो नान्यस्य, अपितु चिन्तायाः एव शवः।"—गंभीरस्वरेणाऽवदत्सा।

—बिल्वोऽपश्यत्—"चिन्तामणिलपनेऽपि शवतुल्या विकृतिरंकुरायते"। तस्माद्-भीतो विशृंखलस्वरेणापृच्छत्—"त्वमपि मत्साहाय्याद् विमुखी जाता ?"

—सत्यसाधिकाऽहम्। असत्यं कदापि नानुसरामि।

—"तावत् सत्यान्वेषणं करिष्ये"—सहसा मुखरितो बिल्वः।

—गच्छ साधक ! सत्यान्वेषणे स्वास्तित्वं समापय। यस्मिन् दिने सत्यम-वाप्स्यसि, तस्मिन्दिने चिन्तामणि-र्भविष्यति त्वदन्तिके।—इति बोधयन्ती कक्षान्तः प्रविश्य द्वारं पिहितवती।

क्षणं यावत् मूक इवातिष्ठद् बिल्वः, ततश्च हरिनाम समुच्चरन् सरित्तीरं प्रति प्रतस्थे। शनैः शनैर्जलस्तरोऽपि विप्लवं विहाय नतिमगात्। शेषयामिनी कृष्णा-रोधस्येव व्यतीता बिल्वेन। प्रत्यूषे प्राचीप्राङ्गणे स्वर्णिमभास्कर उदियाय। मन्दिरस्य घण्टानादेन मंत्रमिव पूरितं बिल्वकर्णयोः। सम्मोहितश्चासौ मदिरमभिप्रयाणाऽभवत् विचलिस्तदानीमेव नाविकस्वरेण तन्मयता भंजिता।

—अपि नैवोद्घाटितं रात्रौ द्वारम् ?

—नाविक ! सदैवार्थमनावृतं द्वारम्। साम्प्रतमभूतपूर्वयात्रायै चलामि।

—बिल्व ! इदानीमतितरां प्रसन्नः प्रतीयसे ?

–सत्यान्वेषणाय गच्छन्नस्मि ।

–अपि परित्यक्तस्त्वं चिन्तामणिना ?

–तया तु दीक्षा प्रदत्ता । मायास्ति सा, मायामर्म-विज्ञानं विना, तद्-भोगं विना वा कोऽपि सत्यं प्राप्तुं न शक्नोति । माया एव मां मदान्धं सत्यज्योत्स्नां प्रति प्रेरितवती । नाविक ! हरिं भज ।

–"हरे ! मुरारे भुवि रक्ष त्वं माम्"—हरिनामकीर्तनं समुच्चचार बिल्वः ।

–विस्मितोऽभूत् नाविकः । बिल्वस्य परिवर्तितव्यवहारे विश्वास एव नाभवत् । बिल्वान्तर्मनः परीक्षमाणो जगाद—"बिल्व ! इतः पुनर्यात्रा न भविता किम् ?"

–नाविक ! इतस्ततः पारभेदोऽभवत् विघटितः ।

बिल्व ! भोगवादात् श्रान्तः, विरक्तोऽसि किम् ?

–नहि नाविक ? भोगस्तु आत्मधर्मः । ह्यस्तु तनुभोगतन्मयश्चासम्, अधुना स्वान्तभोगाय प्रयतिष्ये ।

–गार्हस्थ्यमवाप्स्यसि ?

–नाविक ! जगदिदं मदीयगृहं, संसार एव गृहस्थरूपम् । आवयोः किमस्ति चान्तरम् ? पुनर्हरिकीर्तनं चकार—"हरे ! हरे ! हर, तमो हरे !"—

–नाविकाधरौ चापि बुद्बुदायितौ—

हरे ! हरे ! हे हरे ! हरे !

\+ \+ \+

सूर्योदयेन समं बिल्वजीवनमपि परिवर्तितमभूत् ! नगरीनयनानि साश्चर्यं व्यलोचयन् तद्व्यवहारं, परं नैकमपि नयनं विश्वासमभजत् । प्रकृति-परिवर्तनमविश्वसनीयमेव भवति, परं प्रभुकृपातो वरदानवशाद्वा असंभवोऽपि संभाव्यते । बिल्वस्य परिवर्तितव्यवहाराद् तत्परिजनाः अपि प्रसन्नाः अजायन्त, गृहे निवसतिञ्चाग्रहवन्तः, किन्तु बिल्वस्यैकमेवोत्तरमभवत्—"संसार एव सर्वेषां नः निकेतनम्" ।

सम्पूर्णदिवा पुरेऽभ्रमत्, मन्दिराद् बहिरूपाविशत्, न च केनापि समभाषत बिल्वः । मुखात्केवलं भगवन्नाम भवतिस्म मुखरितम् । कदाचित्तु एवमचेष्टत, तस्मात् प्रमत्तभ्रान्तिश्चाजायत दर्शकानां मतिषु । मन्दिरोपासकः कश्चिददास्यत्प्रसादं, तर्हि महर्षमग्रहिष्यत् । कोपि परिजनसदस्यः प्रापयिष्यत्तस्मै भोजनं, तदाऽश्नुतेस्म एकदा पितृव्यतनुजेन भोजनकाले भणितम् :—

–बिल्व ! विज्ञस्त्वम् ।

–विहस्य तूष्णीमभजद् बिल्वः ।

–विवाहं रचय ।

–स्वाभिमानोन्नतकन्धर मुवाच बिल्वः—"जातो मद्विवाहः" ।

–किं कथयसि ?

–सत्यमेतत् ।

–अपि चिन्तामणिना समम् ।

–मुक्तहासानन्तरं क्षणं विरम्य सोऽवदत्–"गुरुः सा मे, तया सह पुनः कथं संभाव्यते विवाहः ?

–तत्पुनरन्यया सह ?

–किं न पश्यसि ? विवाहस्यार्थो बन्धनमेवास्ति, बन्धनयुतोऽद्य मदात्मा । नातः परं दूरमपसर्तुं शक्नोति मदन्तिकमेव वसति, मधुरगीतं श्रावयति, कदाचित्तु वेणुवादनेन विस्मयति, किन्तु दृष्टिपथं नायाति, तेनैव सह वसामि नित्यम् ।

—गृहे वसन्तपि भक्तिमाचरितुं क्षमोऽसि ।

—नैवाऽप्स्यामि शान्तिं गृहकुड्यवेष्टितोऽहम् । बन्दीभूतं निजमनुभवामि तत्र । गृहे तु देवप्रतिमां स्थापय, तस्मात् तासां भित्तीनां कालिमा परिमार्जितः स्यात् ।

—त्वदीय सामग्रीः, गृहवस्तुजातञ्च ?

—अरे बन्धो! नास्ति किंचन मदीयम्, तस्येश्वरस्य सर्वं । तत्प्रसादे सर्वाधिकारः । पुण्यात्मने न्यूनाऽवश्यकता, पापिने त्वधिका वर्तते प्रसादावश्यकता । सर्वे कामयन्ते कल्याणं, गच्छाऽधुना, सर्ववस्तूनि परिवारजनेषु वितर, पुनः कदापि न कथनीयं त्वया यत्—"बिल्व! इदं त्वदीयं, तत् त्वदीयम्"

पितृव्यजभ्राता तदीयं दृढनिश्चयं निशम्य व्यथितमना गृहं प्रायात् ।

बिल्ववस्त्राण्यपि संजातानि जीर्णशीर्णानि, किन्तु नासीद् बोधः स्वशरीरस्य । भगवन्नीराजनासमये मृदंगध्वनिमनुनृत्यतिस्म प्राङ्गणे । यथा-यथा मृदंगस्वरस्तीव्रतरं वर्वधे, तथा तथैव सो वियत्प्लुतिमना उच्छलति स्म । श्रान्तश्चान्ते धूल्यामेव लुठति स्म, आनन्दमग्नः शफरीव कल्लोलकेलिमाचचार ।

मुखात्तस्य निरन्तरमभूत् ध्वनि र्मुखरितः—

"गोविन्द! गोविन्द! हरे! मुरारे! हे कृष्ण! गोपाल! दयां विधेहि! तत्क्षणं प्रतीयते ननु बिल्वस्य प्रत्येकरोमकूपाद् "गोविन्द! गोपाल!"—नामध्वनिः संकीर्तितो मुखरितश्च भवति ।

केदिदुदण्डबालकाः—"चिन्तामणिः चिन्तामणि" रिति व्यंग्यस्वरान् वायुमण्डले विकिरन्ति स्म, परन्तु बिल्वः "गोविन्द! गोविन्द! नामकीर्तन एव निमग्नोऽवर्तत । केचिदबोधबटुकाः प्रमत्तमवगम्य बिल्वं प्रस्तरशकलैः प्रहारयन्तिस्म, परन्तु तदापि स्मितहासपूर्वकं सः "गोपाल"—शब्दमेवोच्चरति स्म । एवमभूत् बालकानां क्रीडनकम् विनोदि-युवकानां च हास्यसाधनं बिल्वाचरणम् ।

युवत्यस्तु बिल्वस्य साधनां तन्मयतां च वीक्ष्य स्नेहार्द्रस्वान्ताः अभूवन् । वृद्ध परिजनास्तस्य जागृतविवेकं विस्मयेन पश्यन्ति स्म, तत्-श्लोकमभ्यशंसन् च ।

एकदा नामसंकीर्तनावसरे कश्चित् पीताम्बरधरो भक्तः प्रणमन् बिल्वं संबोधितवान्—

—"जयतु गोविन्दो, जयतु गोपालः" ।

–नयनमुन्मील्य तदभिमुखमपश्यत्, पुनः सहसोत्थाय बिल्वस्तं भुजयोराश्लिष्य प्रत्युदतरत्–"गोविन्द! गोपाल!" जयतु जयतु हे हरे! हरे! कथयन्नर्तितुमारेभे ।

पीताम्बरधारी जगाद—"बिल्व! ब्रह्म दिदृक्षसि ?"

–क्वास्ति?—व्याकुलमना अवोचत्सः ।

–आयाहि मया सह ।

–कुत्र ?

–गुरोः सकाशे ।

–नहि,नहि, कुत्रापि न गमिष्यामि । मद् गुरूस्तु चिन्तामणिः ।

–बिल्व! चिन्तामणिस्तु प्रेरणाऽस्ति, नैव गुरूः ।

–क्रोधरंजिते बिल्वनयने, वक्रतामाप्ते भृकुट्यौ, असंयतस्वरेण प्राजल्पत्—"चिन्तामणि र्महामहिमामयी माता, आद्याशक्तिस्वरूपा । तच्चरणारविन्दपरागेण गन्धं गृहीत्वा दृढसंकल्पितोऽहम् । दिशादायिनी सा माम् । मिथ्याचारी च त्वम्, शत्रुरसि चिन्तामणेः । षड्यन्त्रसंयोजकश्च प्रतीयसे ध्रुवम् । साधनापथाद् विचालयितुं प्रयतसे माम् ?

पीताम्बरधरो विनीतस्वरेणाऽवोचत्"विवेकी सन्नपि मिथ्याकल्पनायां जीवसि" ? मन्यसे शक्तिस्रोतस्विनीं देवीं चिन्तामणिमिति, सर्वथोचितम् । वस्तुतः श्लाघनीया सा, यत्प्रेरितस्त्वं सत्यान्वेषणतत्परोऽभूः । किन्तु तदपि सत्यं यत्-सापि भ्रमति सत्यान्वेषणाय । गुरूं बिना सन्मार्गसिद्धिर्नावाप्यते । स्वयं चाहं श्रद्धानतश्चिन्तामणिं प्रति, परं त्वां मित्रंमन्यमानो गुरूसान्निध्ये प्रेषणाय प्रयतेऽधुना ।

–अपि दीक्षितस्त्वं गुरूणा ?

–आम्! तस्मादेव त्वामुपगतोऽस्मि । बिल्व! नैव विश्वसिष्यसि यत् गुरूणैव प्रेषितोऽहं त्वत्समीपे ।

–किं कथितम् ?

–आम् ! सत्यमिदम् ।

–किमादिष्टं च तेन ।

समाधेरन्तरालात्पक्ष्मणी प्रोन्मील्य गुरूणादिष्टं—"वत्स! नगरेऽस्मिन् महात्मा विचरति । यद्यपि कृष्णतन्मयः सन् विस्मृतदेहाध्यासो जायते सः, परन्तु परमसत्य

द्वारप्राप्तेर्नैषः पन्था । तस्य वैकल्यं विलोक्य बलाद् हृदि दयार्णवो मथ्नाति । चिन्तामणिशिष्यः सो नितान्तं व्यथितः, दीक्षामपेक्षते च । अतो गच्छ, ससम्मानमानय तम् ।

—कुत्र निवसति गुरूस्तव ?

—कृष्णारोधस्येव ।

—किं नामधेयोऽस्ति त्वद्गुरूः ।

—महात्मा सोमगिरिः ।

—अपि प्राप्तं तेन परमसत्यम् ?

—बिल्व! महाविज्ञास्ते ?

—किं मामपि दर्शयिष्यन्ति ते सत्यमार्गम् ?

—बिल्व! त्वदीयसंकल्पः, कठिनसाधना चैव त्वां सत्यप्राप्तये संबलयिष्यतः । गुरूस्तु दिशानिर्देशात् भ्रान्तिपथात् निवारयति ।

बिल्वमंगलः कुटिलहासपूर्वकं पीताम्बरधरमभिपश्यन् उवाच—"चलतु तावत्, त्वद् गुरोरात्मतत्वं परीक्ष्ये ।

ततश्च पीताम्बरधारिणा साकं हरिनाम संकीर्तयन् सः सोमगिरेराश्रमं प्रापत् । तत्राऽपश्यद् बिल्वः—

आसीत्प्रसृतेव शान्तिः सर्वत्र । आलवालेषु विविधपुष्पपादपविरचिता प्रभुनामावलिस्तदीयसत्तां प्रकाश्यमानेव व्यराजत । कवचन 'हरि'-नामाक्षरखचिता पुष्पलता, क्वचिद् गोपालाक्षरै रारोपिता पाटलमाला, अन्यत्र गोविन्दनामचित्रिता रजनीगन्धा अपरत्र माधवयुगलप्रतिरूपिता नीलपीतवर्णाञ्चितपुष्पा वकुलचम्पकनिकुञ्जावलिश्च कूजद्विहगकलरव मुखरिता स्वसौन्दर्यप्रकाशनतत्परा इव शुशुभिरे । कृष्णासरिद्वेगाद् कौशलप्रवर्तिताः जलकुल्याश्च प्रसृताश्रमावनिं हरितदूकूलेन आच्छादितवत्यः । क्वचिद् धावन्ति मृगाः, क्वचित्कूजन्ति शुकाः, क्वचन नृत्यन्ति मयूरयुगलाः, अपरत्र चरन्ति मृदुलहरित्तृणं गावः, एकत्र गोमयप्रलिप्तायां विस्तृतवेदिकायां शान्तमनसः पीताम्बरधराः बहवः शिष्याः समुपाविशन्ति स्म । अथच-विमलतारकपुंजेषु विधुरिव मध्ये विराजमानः दिव्याकृतिश्चन्दनचर्चित-विशालभालः, अग्निस्फुलिंगनेत्रयुगलः, श्वेतबभ्रुजटाघटः, काषायवासाः, तुलसीदलग्रैवेयकः, कमण्डलुसतीर्थ्यः, ताम्रवर्णविग्रहः हरिनाम जपन् स्फुरिताधरः, धर्ममूर्तिरिव साक्षात्, महात्मा सोमगिरि र्दृष्टिपथमायाद् बिल्वस्य ।

आयान्तं वीक्ष्य भक्तबिल्वं माहात्मा जगाद "एहि भक्त" ।

–एकस्मिन्नेव क्षणे खंडितोऽभवत् बिल्वमंगलस्याहंकारः । विनतशिरोग्रीवः सोमगिरेश्चरणयोः प्रण्यपतत् बिल्वमंगलः । शिरसि वरदहस्तं स्थापयन्नुवाच गुरूः— "पूर्ण योगी भविष्यसि" । गुरोराशीर्वचनमाकर्ण्य सर्वे शिष्याः बिल्वमंगलाभिमुखं व्यलोकयन् । निर्भीकभावेन निवेदितं बिल्वेन—

—"गुरुदेव ! दिशां दर्शय ।

–बिल्व ! साम्प्रतं वर्तते कल्मषकालुष्यं त्वदन्तःकरणे, संकल्पं दृढय, अवहितो भव सदाचरणं प्रति विशेषतः । प्रमत्तप्रलापवत् क्रन्दनात् नावाप्स्यसि सत्यम् । संस्कार-भूमिकां निर्मलय, स्वान्ते विलोकय । सत्यं शाश्वतम्, स्वात्मन्येव सत्यम् । यथा यथा त्वत्कमलकलिकाः विकसिष्यन्ति, तथा तथैव स्वतो गन्धमुदेष्यति, तत्क्षणं गन्धयुवयोर्भेदोऽपि निरस्यते । स्वयं सुगन्धमयो भविष्यसि ।

बिल्वमंगलेन सोमगिरिचरणमवलम्ब्य करुणं विलापितम्–महान् पापोऽहम् । पित्रोरादेशान् सदाऽवहेलितवान्, परमसत्यं च सदा तिरस्कृतवान् ।

–बिल्व ! सहजजीवनं यापितं त्वया । प्रतारणां कृत्रिमतां च विहाय भोग-माध्यमेन आनन्दप्राप्तये प्रयतितम् । यद्यपि भोगे वर्तते तन्मयता तृप्तिश्च, किन्तु क्षणिके त्वेते । एतन्माध्यमेन सत्यपर्यन्तमभिसरणं नैव शक्यते । भोगवादः समाधौ बाधकः, वासना-विकारस्तन्मयतालयं विशृंखलयति । भोगस्थाने भक्तिसंकल्पं समाचर । सौन्दर्यस्य परमसत्ता प्रभौ वर्तते । उत्तिष्ठ भक्त ! निश्चयं प्राप्स्यसि स्वलक्ष्यम् ।

एवं गुरोराशीर्वादं प्राप्य बिल्वस्तस्मिन्नेव तपोवने न्यवसत् । देहसौन्दर्यं विस्मर्तुं यथासम्भवमयतत सः, किन्तु कस्मिन्नपि क्षणे सौन्दर्यं वीक्ष्य तन्नयने लास्यपरायणेऽभवताम् । तदानीं तारस्वरेण गोबिन्दनामजापेन संयमतिस्म स्वान्तम् । सन्यासीव काननविचरणं नैव रोचते स्म तस्मै, न च समाधिमाधाय जगत्संबन्धं भङ्क्तुमैच्छत् । प्रतिदिनं देवालयं गत्वा सनामकीर्तनं मृदंगध्वनौ प्राङ्गणनृत्यं न व्यस्मरत् । तन्नृत्य दिदृक्षवो बहवोऽजायन्त एकत्रिताः । बिल्वस्वरेण सह समुदायस्वराश्चापि हरिनाम-कीर्तनरताः बोभूयन्तेस्म । कीर्तध्वनिं श्रोतृणां चरणानि स्वतस्तालोत्थानि अभवन् तदानीम् । यौवतं साश्चर्यं वीक्ष्य तं मंत्रमुग्धमिवाजायत, किन्तु विगतजीवनाचरणानि विचार्य बिल्वभविष्याय चिन्तितमभवत् ।

इतो नदीतटे वसन्नपि बिल्वो द्वितीयतीरस्थेन वारांगनाकर्षणेन नाकृष्टोऽभवत् कदाचित् । सरिद्वीचयो भूयसाऽमंत्रयन् तं, परन्तु गोबिन्दनामोच्चारपूर्वकं तपोवनं प्रत्यगच्छद् विरक्त इव ।

एकदा समागच्छत् तपोवनं मठाधिपः सोमगिरिसम्मेलनाय । तत्र बिल्वं विलोक्य संयमविरहितोऽब्रवीत् ।

–कुतोऽयमत्र बकभक्तः ?

मा मैवं ब्रवीतु श्रीमान् ! पूर्णभक्तोऽयम्" सोमगिरिणा गंभीरस्वरेण भणितम् ।

–नैव जानाति भवान्निमम् ।

–अस्मदधिकं स्वयं जानात्ययम् ।

–भवानपि विमोहितोऽस्य इन्द्रजाले । महाधूर्तोयं, देवनर्तक्याश्चिन्तामणेः सौन्दर्यं विनाश्य नीवनसुन्दर्यान्वेषणतत्परो भ्रमति ।

–नवीनसत्यस्य अन्वेषणतत्परस्त्ववश्यम् ।

–महर्षे ! अस्य मनोगुहा विकारभस्त्रिका । विषकुम्भोऽयं सुधास्नापितोऽपि दुष्प्रवृत्तिं विहातुं नैव शक्नोति । वासनायाश्च घृणितकीटोऽयम् ।

–श्रीमन् ! वासनैव जीवने निजानन्दं गमयति मानवम् । यदि भवेत्सत्यं प्रति उन्मुखो वासनाकेन्द्रस्तर्हि सहजेन साफल्यं प्राप्यते साधकजनेन । बिल्वेन नाऽवरणाच्छन्नाः स्वविकाराः । मुक्तनृत्याय संयमविरहिताश्चानेन विकृतयः किन्तु नाऽयं पतितः ।

–कवचेनाऽच्छाद्यते पापं भवता ?

–श्रीमन् ! पापस्तु सोऽस्ति, यः सत्यावरणं परिदधानो विकृतिसहायो विक्रीडति । पापस्त्वावरणे जीवति ।

–अवनतेऽभूताम् लज्जया नयने मठाधिपस्य । मन्दस्वरेण पुनरुवाच—"भवान् जानात्यधिकं सत्यमीमांसाम्, किन्त्वहं चिकथिषुरियन्तं केवलम् यत्—नैषः पश्चात्तापसक्षमः" ।

सोमगिरि-प्रत्युत्तरात् पूर्वमेव बिल्वो जगाद–"पश्चात्तापबह्निस्तानेव विशोद्धुं समर्थाः; येषां स्वान्ते सत्यस्नेहोऽवशिष्यते । मम तु गोविन्दनाम-प्रयोजनम् ।

–"मन्दिरे प्रवेशानर्हस्त्वम्"—सावेशमवोचन्मठेशः ।

–त्वमप्यसि मयि ।

—मयि जीवति सिंहद्वारमप्युल्लंघितुं न शक्नोषि ।

—मठाधिराज ! नास्ति त्वन्मन्दिरमात्रे मद्भगवान् ।

—अपि पारे तस्मिन् सरितः वसति ?—व्यंग्येन भणितं तेन ।

—केवलं पारे ? सर्वत्र व्याप्तोस्ति सः ।

—किन्तु न त्वयि ।

—कथं स्थातुं शक्नोति मयि ?

—पापोऽसि यतोहि ।

—मठाधीश्वर ! यदि नाभविष्यत् पापमिदं, तर्हि स्वान्ते निरीक्षणावसरोऽपि नावाप्स्यम् । भवत्तुल्योऽहमपि बाह्यसौन्दर्यदर्शनपरोऽभविष्यम्, एकदा समाप्स्यम् च चाकचक्येऽस्मिन् जीवनयात्राम् । अहमिकया मदीयमिथ्याभावोऽभूत् प्रसूतः, अनेनैव चिन्तामणिं यावत् प्रापितोऽहम् । चिन्तामणिममतैव मां बोधितवती सत्यदिशाम् ।

अट्टमहसत् मठेशः । उच्चस्वरेणाजल्पद् विहसन्—"वेश्याममता सत्यं प्रापयिष्यति मूर्खम् ? नात्र जगति मूर्खाणामभावः । प्रतीयते यत् सर्वस्वमपहृत्य तया सुन्दर्या निष्काषितोऽयं प्रासादाद् बहिर्बलाद् । साम्प्रतं चाऽसहायो दुर्बलोऽयं वृथा चेष्टते मनोविनोदितुम् भक्त्या । अरे ! ओ भक्ताडम्बर ! मां भ्रमयसि ? नहि भविष्यमि पाशायितस्त्वद्वाग्जाले ।

—नावमन्यते स्म किंचिदपि तत्कथनं बिल्वः न चाजायत विचारान्दोलनं अमर्षोत्तेजनम् वा तदन्तःकरणे, अपितु मुखरितवान् गोविन्दनामध्वनिम् । पवनचालित पर्णैरपि तदनुकरणमिव प्रकटितम्, खगकूजनैरनुरणितं तत्संकीर्तनम्, परन्तु मठेशोऽन्तर्दंदह्यमानः श्यामलास्यवर्णो बभूव ।

—मठेशं पश्यन् सोमगिरिरुवाच—

—"स्वकीयविचारान् परिवर्तयतु भवान्" ।

—पापो दुराचारी चाऽयम् ।

—एतादृशानां कृते तु मन्दिरद्वाराणि नावरोधनीयानि । पुण्यात्मनां साधूनां च मनांसि स्वयं मंदिररूपाणि ।

स्वावमानमसहमानो मठाधिपस्तं बिल्वं यथावसरं पराजेतुमना सावेशं चुक्रोश—

—विजयस्तु मदीयो भविष्यति, वञ्चकोऽयमेकदा स्वमूलरूपे निर्वर्तिष्यते, तदानीं सर्वे भवन्तो ज्ञास्यन्ति अद्यतनीयविवादनिष्कर्षम् ।—इति कथयन् आश्रमाद् बहिरगच्छत् ।

–"सत्यमेव जयते सदा"—स्वनिष्कर्षमुद्घोषितवान् सोमगिरिर्वातावरणे। गर्वभ्रमितो मठाधिपो दीर्घचरणन्यासैर्गच्छत् मुखमपि न विवर्तितवान्। शान्तमना बिल्वो गोविन्दनामकीर्तनपरश्चासीत्।

बिल्वमुद्दिश्य सोमगिरिरुवाच—

–समुपस्थीयन्ते भक्तौ बाधाः।

–गुरुदेव ! मठेशवचनमपि सत्यम्। तदन्तेऽपि सत्यम्।

–किन्तु बहिस्त्वसत्यम्।

–मया तु बहिरपि केवलं सौन्दर्यमेव विलोकितम्, तेषामावेशेऽपि सौन्दर्य-सत्तास्ति, यथा नटराजो गोपीमानमर्दनाय वेणुं वादयतीव ध्रुवम्, गोपिकानामन्तस्तापं शमनकामो वेणुरहंघोषमुदीरति ननु।

–बिल्व ! यथेष्टदिशायां वर्धसे।

गुरुदेव ! ममतामयीं चिन्तामणिं दिदृक्षुरहं, यदि भवतः स्यादाज्ञा, तर्हि पारे गन्तुं नाविकमाह्वयामि।

–बिल्व ! चिन्तामणिः प्रतिदिनमिहैवायाति, तावदत्रैव द्रक्ष्यसि ताम्।

–अत्रैवाऽयाति ? साश्चर्यमपृच्छद् बिल्वः।

–त्वत्साधनाप्रेरणास्ति सा, तस्याः प्रयासादेव तपोवनेऽस्मिन् प्राप्ताश्रयस्त्वम्। बिल्व ! नैषा साधारणास्त्री; तस्याः वैदुष्यात् तत्त्वज्ञानाच्च जगत् दिशानिर्देशं प्राप्स्यति।

किमपि नोत्तरितं बिल्वेन। गोबिन्दनाम समुद्घोषयता प्रस्थितं शनैः।

\+ \+ \+

१२

सोमगिरेः योग प्रेरणया चिन्तामणेर्दर्शनं प्राप्य बिल्वो भक्तिसरोवरे निमज्जित इवाभूत् । तपोवनस्य दूर्वाश्यामलवेदिकायामासीना श्वेतवसना, वीणापाणिः सा चिन्तामणिः, श्यामसुन्दरस्य वन्दनागीतं गायन्ती स्वरसुधारसं वातावरणे विलेपयन्तीव दृष्टिपथमायाद् बिल्वस्य ! तस्याः स्वरमाधुर्येणाकर्षिताः समग्रदिशः प्रद्रुत्य समेतुं गोपिकाङ्गना इवोत्सुकाः जाताः, परन्तु लोकमर्यादावशान्नापारयन् ।

चिन्तामणेरन्तःसौन्दर्यमनुभूय बिल्वो विस्मितोऽभूत् । अन्तस्तरंगितश्च तस्याः स्वरतालमनुनर्तितुमारेभे । तत्क्षणं विस्मृतवान् सः सर्वं जगत्, चिन्तामणे र्बाह्यसौन्दर्यं च ।

यदा पुनर्नयने चोन्मीलितवान् तदा नासीत्तत्र काऽपि । न चिन्तामणि र्न च ब्रह्मचारिणः । सर्वतोऽपश्यद् बिल्वः, पृष्ठभागे स्मितवदनोऽतिष्ठत् सोमगिरिः । सत्वरं प्रणम्य चरणयोरवनतो बिल्वो जगाद–

–"गुरूदेव" !

–तच्छिरः कृपाकरेण करेण स्पृशन् गुरुरुवाच–"अपि संगमितस्त्वं चिन्तामणिना !"

–भवत्कृपया । एवमेव सत्यस्य दिव्यसौन्दर्यमपि दर्शयतु भवान् योगमायाबलात् ।

–बिल्व ! भक्तिरेव सौन्दर्यम्, भक्तिरेव जीवनसत्यम्, भक्तिरेव मोक्षम् । चिन्तामणिः स्वयं भक्ति रूपाऽस्ति । न सा त्वत्तो दूरं कदापि ।

–आम् गुरूदेव ! मदन्तिकामनुभवामि ताम् । प्रथमबारमद्य मयाऽन्तः-सौन्दर्यमनुभूतं, किन्तु बाह्यसत्तापि नास्ति न्यूनसौन्दर्या ।

–सौन्दर्यं तु सौन्दर्यमेव भवति बाह्यमथवा स्यादाभ्यन्तरीयम् । सत्यं कदापि न तिरोहति ।

–प्रत्येक वस्तुनि सौन्दर्यमनुभवामि ।

–बिल्व ! संसारोऽयं सौन्दर्यमयः । सर्वत्र व्याप्तं तत् । त्वयि, मयि, चिन्तामण्यां, सर्वेषु च तदीया सौन्दयसत्ता विराजते । एकदा स्वयंमनुभविष्यसि यत् प्रत्येकस्मिन् स्थावरे जंगमे वा गोपालरूपं तदमितसौन्दर्यमाभासते, प्रकाशते, विराजते च ।

–गुरूदेव ! किं संभविष्यति चैतत्सर्वं ? द्रक्ष्यामि तस्याप्रतिमं रूपम् ?

–बिल्व! दर्शनं तु कुर्वन्नसि साम्प्रतमपि, किन्तु नानुभवसि ! यस्मिन् दिने चानुभूतिं प्राप्स्यसि, न तदानीं शक्ष्यसि तदभिव्यक्तुम् । अनेनैव गोपालमंत्रेण तं साक्षात्करिष्यसि ।

इत्युपदिश्य सोमगिरिः स्वोटजं प्रतस्थे । बिल्वोऽपि कृष्णातीरस्थः सन् मधुरोर्मिसंगीतं शृण्वन् तन्मयोऽभूत् । व्यचारयच्च–सृष्टिरेव गोपालमया । तस्यैवाऽसंख्यरूपाणि, विविधाकृतयः, विभिन्नकर्मलीलाश्च सन्ति । वीचिषु तस्यैव वेणुनादः, चिन्तामणिशरीरे मनसि वा तस्यैव सौन्दर्यसत्ता विभासते । सर्वत्रैव गोपालसौन्दर्यम् ।

कदाचिद् वीचिसंगीतमशृणोत्, जातु तपोवननीरवतां व्यचारयत्, अथच जगद्व्याख्यां व्यमृशत्, कदाच चिन्तामणिसौन्दर्यसागरस्यानुभूतिमस्मरत्, पुनः स्वयं धिक्कारयन् गोपालनामकीर्तनपरायणोऽभवद् बिल्वः । एवं चिन्तयन्नेव शेषयामिनीं यापयामास । प्रत्यूषवेलायां पुनः मंदिरं प्रतस्थे । आसीत्तत्र गुंजायमाना तुमुलशंखनादेन मिश्रिता मंगलगीतस्वरावलिः । सदाभ्यस्तः कीर्तनतन्मयो बिल्वो नर्तितुमारेभे । दर्शनार्थि-समुदायोऽपि अभूदेकत्रितः । यदा च नृत्याद् विरमितः सस्तदानीमर्धोन्मीलिते तन्नयने समक्षस्थितां कांचिदद्वितीयसुन्दरीमपश्यताम् । तत्रैव स्थगिताभूत् बिल्वदृष्टिः ।

अहो रूपलावण्यम् । क्षीरसागरे स्नापितविग्रहात् परागमंजरीव स्रवति किल । कृष्णागुरुधूपितानि तत्कुन्तलानि रसातलचुम्बनाय जिह्वाग्रभागान् पुनः पुनः प्रसारयन्ति ननु । नयनशुक्तिदलयोर्मुक्तातरलतेव क्रीडतितराम् । कोमलकपोलयो रूषःप्रथमकिरणेन विहस्य अरूणकिंजल्कमिव विकीर्णम् । भालचुम्बितां शोणिमललन्तिकां सन्ध्यांशुमालिबिम्बमिवाववहन्ती सा नितरां व्यमोहयद् बिल्वमानसम् । व्यस्मरत्तदानीं गोपालनामकीर्तनं बिल्वः । कुंकुमरेखारंजितसीमन्तिनीं तामपूर्वसुन्दरीमुपगम्य मंत्रमुग्ध इव बिल्वो बभाषे"अयि सुन्दरि ! का त्वम् ?"

भयाक्रान्ताऽभूत् तदाचरणाद् युवती । बिल्वस्य मलिनलपने बह्निस्फुलिंगवद् दंदह्यमानेक्षिणी च वीक्ष्य श्वासगतिरवरूद्धैवाऽभूत् तस्याः । क्रन्दनं चिकीर्षोऽपि तस्याः

मुखात् स्वरलेशोऽपि न निःसरितः। निजानने सव्येतर-करं निधाय द्रुतं पलायनपराऽभवत्सा। तत्क्षणं व्यस्मरत् स्वदेहाध्यासमपि। महार्ध्यविभूषणानि खण्डशो विकीर्णानि यत्र तत्र पलायनकाले नितरामुपाहसन् किल तां सुन्दरीम्। प्राणेभ्योऽधिकं यानि चाभूषणानीप्सतिस्म सा, साम्प्रतं विमुच्य मोहं करेणुरिव धावन्त्यासीत्। कदाचिद् ग्रीवाभंगाभिरामं मृगीव पश्चादपश्यत्, नानुपतति बिल्वेऽपि कल्पितभयाकुला प्रतिक्षणं तीव्रतरमधावत्सुन्दरी।

विविधञ्च तर्कितं नागरिकैस्तद्गतिं वीक्ष्य, किन्तु तस्याः मनोदशां कस्यचिदपि बुद्धिर्नाऽस्पृशत् निजभवनं प्रविष्य पृष्ठेन पिहितद्वारभित्तिमाश्रयन्ती सा श्वासवेगं विश्रामयितुं प्रायतत। वक्षसि करौ निधाय निःसरन्तः प्राणान् बलाद् अवरुणत् ननु। सत्वरमुपगत्य तत्सेविका साश्चर्यं विलोकितवती तस्याःव्यवहारम्। स्वानुचरीं संबोधितवती सा—"मणे! किं मदाननं पश्यसि? शीतलजलं सत्वरमानय।

—मणिर्द्रुतं रजतपात्रे जलमादाय समुपस्थिताऽभूत्। जलपानानन्तरं किंचिदाश्वसितां स्वामिनीं मणिरपृच्छत्—

—'कथं भयविह्वला भवती?

—मणे! अनर्थोऽद्याऽभविष्यत्।

—किं जातं? स्वामिनि!

—सः!!! देवमन्दिराद् बहिर् .....

इति कथयन्ती बभूवाऽधीरा।

—स्पष्टं भणतु किंचिद् भवती।

—न त्वरय, मदीयास्तु श्वासा एव न यथास्थितिमिताः।

—मणिः प्रायतत तन्नयनयोः किंचिद् रहस्यमन्वेष्टुम्।

—अयि मणे! नृत्यति सः।

—किं न जानाति भवती तम्?

—प्रतिदिनं पश्यामि।

—सुन्दरं नृत्यति सः, तद्-दर्शनाय जनसमूहो परितः समेति।

—तन्नयने.....इति गदन्ती पुनर्भयाक्रान्ता सा।

–भवत्या किं विलोकितं तन्नयनयोः ?

–वासना ताण्डवम् ।

–सस्तु प्रमत्तः ।

–नहि मणे! नासौ किंचिदुन्मत्तः, अपितु विधत्ते प्रमत्तान्नपरान् ।

–इयान् सुन्दरस्तु नास्ति ।

–सौन्दर्यगीतं नैव गायामि ।

–चिन्तामणे रुपासकः सः । सम्पूर्णनगरं तत्प्रकृत्या परिचितः । न जाने सहसा कथं परिवर्तितव्यवहारोऽभूत्? किं कथिता तेन भवती ?

–मदन्तिकमुपेत्य सोऽब्रवीत्—"सुन्दरि! का त्वम् ?"

–"किमुत्तरितं भवत्या"? सोत्सुकं पृष्टवती मणिः ।

–किमुत्तरणीयं मया ?

–निजपरिचयः प्रस्तावनीय एवासीद् भवत्या ।

–मणे! मदीयं तु रोम-रोम भयाक्रान्तं, अथच तत्क्षणं केवलमेकमेवोपायमपश्यम् —"सत्वर पलायनम्" ।

–तस्मादेव श्वासाः उत्प्लवन्ति भवत्याः ।

–मणे! किमधुना भविता ?—संभाविताशंकां कल्पयन्ती जगाद सा । तदानीमभूद् भयात्कंटकितेव सा ।

–व्यर्थं चिन्तयति भवती ।

–प्रत्यहं मम देवालयगमनं, तदीयं च तत्र नर्तनम् ।

–मा पश्यतु तन्नृत्यम् ।

–किन्तु तन्नयने तु द्रक्ष्यतो माम् ।

–स्वयं संयमिता सावहिता च भूयात् ।

–मणे! श्वस्त्वं मत्सहचरी भविष्यसि ।

–यथाज्ञापयति भवती । एवं निगद्य मणि बिल्वसाहसं मनस्येव प्रशंसितवती । जानाति स्म स्व-स्वामिनीसौन्दर्यम् । नैसर्गिकोऽभूत् बिल्वप्रश्नः । इदमप्यमन्यत सा यत् तत्स्वामिनी साध्वी चास्ति । स्वपतिं परमेश्वरं मन्यमाना सा तदाज्ञयैव नित्यं देवालयमगमत् ।

अन्येद्युः सा मणिसहाया देवालयं गन्तुमारेभे। बिल्वस्तथैव नृत्यरतोऽवर्तत किन्तु क्षणमेकमपि तदभिमुखं नापश्यत् सा। आशंकाक्रान्ता सदैव गृहं न्यवर्तत। शनैः शनैर्विश्वस्ताऽभूत् यत्–"विस्मृतवान् सः प्रमत्तस्ताम्"। कतिपयदिनानन्तरं पूर्ववदेकाकिन्येव गन्तुं प्रावर्तत सा। प्रतिदिनमपश्यत्तां बिल्वः, परन्तु बार्तावसरमपि नाप्नोत् कदापि। एकदा तत्सौन्दर्याऽकर्षितः सस्तन्निकेतनं प्रापत्। आसीत् तदीयं वेश्म सुरम्योपवनपरिवृतः। अनेकाऽनाहकास्तत्र चित्रविचित्रप्रसूनगर्भेभ्यो मकरन्द परागरजांसि प्रस्रवन्तोऽवर्तन्त। प्रतीच्यां च कृत्रिमपल्वले अरूणाम्बुज कलिकाभिः साकं केलिं विधित्सवो भ्रमरगणाः रतिगीतिं गायन्तः आसन्। भवनाद् बहिरेवोपाविशद् बिल्वः। मध्याह्नकाले गृहस्वामी नगरान्निवर्तितवान् गृहं प्रति, तदानीं भवनद्वारालिन्दे मलिनवसनमेकं ब्राह्मणमपश्यत्। शुष्कस्नायुक्द् रूक्षकेशं, कज्जलकन्दरोद्गत–शशक शावकवद् गौरवदनं, मूषकविदारित कुथवद् जीर्णशीर्णाम्बरं, मार्जारमर्दितकपोतवद् विश्रृंखलितमूर्धजं, शिवगणवत् प्रमत्तं तमुपेत्य गृहस्वामी श्रद्धावनतः सन्नब्रवीत्–

–'नमस्ते विप्रदेवाय'।

–श्वेतपरिधानपरिवृतं भव्याकृतिं यक्षदूतप्रतिमं तं गूढं निरीक्षमाणो बिल्वः करद्वयमुत्थापयन्नभिवादनं स्वीचकार।

–गृहस्वामी विनीतस्वरेणावोचत्–"अतिथे! कः कष्टस्ते?

–संसार एव कष्टमयः।

–अपि प्राप्तो भोजनप्रसादस्त्वया?

–नाऽहं क्षुधितः।

–शीतल जलमपेक्ष्यते?

–मदीयतपनं शीतलजलेन शमितुं नार्हति।

–अन्यः कश्चिदभावः?

–श्रेष्ठिन्! अभावमाश्रित्य नागतोऽहम्, अपितु भावाश्रितं मदागमनम्।

–निःसंकोचमाज्ञापयतु भवान्। गृहस्थाय अतिथिसेवा परमोधर्मः।

–विशेषोद्देश्य–प्रेरितं मदागमनम्।

–तावत् कृतार्थो भविष्यामि।

–श्रेष्ठिन्! काचित् सुन्दरी प्रतिदिनं देवालयं गच्छति भवनादस्मात्। भगवदर्चनानन्तरं मदीयनृत्यमपि पश्यति सा। कृष्णार्चनपरा श्यामेव प्रतीयते सा।

एषा सौन्दर्यराशिर्नाद्यावधि विलोकिता मया। एकदा प्रयासितं तदीयाऽनिद्यसौन्दर्य-दर्शनाय, किन्तु भयाकुला सा लोकनिन्दावशात्तत्र स्थातुं नैवाऽशक्नोत्। तदनन्तरं तु मदभिमुखं चापि नाऽपश्यत्सा।

श्रेष्ठी अतिथिमुखं गहनदृष्ट्या व्यलोकयत्, किन्तु काचिदपि विकृतिर्नाऽजायत तन्मुखे।

पुनरुवाच बिल्वः—"भाग्यशाली चास्ति सः पुरुषो, योऽलौकिकसौन्दर्यसहायो जीवति! एतत्सौन्दर्यतुलायां स्वर्गिकसौन्दर्यमपि परास्तम्। तस्याः मुखेन्दुमण्डले दिवापि पूर्णिम-ज्योत्स्ना प्रस्रवति, नयनयोर्विलासवारिदा पक्ष्माणि प्रसारयन्ति, अधरे च प्रकृतिनर्तनं विलसति, गमनकाले चन्दनवनानिलः शनैः शनै संचरतीव। तदीय-सौन्दर्यदर्शनाय चिरं विकलायते मन्मनः। यद्यपि जानामि यत् कस्यापि धर्मपत्नी सा, तदपि स्वान्तमवबोद्धुमक्षमोऽहम्।

—अपि सौन्दर्यपरीक्षकस्त्वम्?"—गंभीरस्वरेणाऽपृच्छत् श्रेष्ठी।

—जन्मतोऽद्यावधि सौन्दर्यदर्शनायैव यात्रामकुर्वम्, किन्तु नाऽपश्यमेतादृक्-रूपातिरेकम्। केवलं सौन्दर्यदर्शनायैव विकलोऽहम्। रूपमहोदधिं नयनैर्निपीयमनाऽहं स्वान्तस्तृप्तये।

—किन्तु सा पतिव्रता.....

मध्ये विरामयन्नुवाच बिल्वः—"श्रेष्ठिन्! नाहमीहे धर्मभंगम्, केवलं सौन्दर्य-दर्शनाय ममाग्रहः।

—अतिथे! साफल्यमाप्स्यति भवत्कामना। अत्रैव प्रतीक्ष्यताम्। इति कथयन्नन्ते प्राविशत्। स्वकीयपत्न्याः सौन्दर्यप्रशंसया प्रमुदितोऽप्यहर्षित आसीत् श्रेष्ठी विचारयन्नतिथेः कामनाम्। गृहे प्रविशन्नवोचद् गृहिणीम्—"शुभलक्ष्मि! प्रसन्ना अद्य देवताः"

—स्वामिन्! वर्तते कश्चित् शुभावहः?

—अतिथिसम्मानलाभो भविता।

—तावन्नयतु प्रसादं—"सहर्षमवोचत्सा।

—शुभे! पार्थिवाभावेन केनचिन्न ग्रस्तोऽतिथिः, अपितु मानसतृप्तिमीहते सः।

—किमीप्सति सोऽतिथिः?

—संसारस्यानुपमसौन्दर्यम्।

—नाऽवगम्यते मया ।

—शुभे ! त्वदीयसौन्दर्यस्याराधक उपासकश्च सः, त्वद्-रूपदर्शनाय नितरां विकलायते, प्रमत्त इव विचरति प्रत्यहं, भगवद्—भक्तिपथाद् विचलितो रात्रावपि सुखेन निद्रां न लभते ।

—कल्पिताऽशंकां साकाररूपे विजृम्भितां विलोक्य सा नितान्तं चिन्तिताऽभवत् । तदीया मृदुला देहलता झंझावात—कल्पनया विकम्पितेवाभूद् भृशम् ।

—शुभलक्ष्मि ! शृंगारय तनुम् ।

—किं कथयति भवान् ?

—यदि कस्यचिद् वेदनामपनेतुं समर्थावावाम्, तर्हि पुण्यमवश्यमर्जनीयम् ।

—किन्तु नार्याश्चापि भवति मर्यादा ।

—रूपा सुधायाः पिपासुः सः केवलम्, तदन्ते न काचिद् विकृतिर्दरीदृश्यते ।

—नैतद् रूपं प्रदर्शनाय ।

—शुभे ! देहदानेनापि कस्यचित्पीडाऽपनीया स्यात्तदापि जन्म सफलनीयं ।

—नाहं समर्थाऽनर्थं विधातुम् ।

—प्रत्यहं देवालय-प्रयाणकाले नगरस्य प्रत्येकनयनं त्वदीयरूपमाधुर्यं विलोकयति, तदर्थमालपति च । अद्य तावत् कश्चित्साधकः त्वदीयरूपदर्शनाय याचते । द्वारस्थः कश्चिद् याचको नैव निराशयितव्यः ।

—साहसमुत्पादयितुं नैव पारयामि ।

—पत्युरादेशमेवांगीकृत्य गच्छ । वचन-विश्वासो मया दत्तस्तस्मै ।

ईदृशनिर्भीको याचकः क्वचन नैवाऽप्यते । शुभे ! तस्य विप्रस्य मानसे नास्ति पापं, न काचिद् विकृतिर्न च वासनावेगः । सौन्दर्यमेव सत्यंमन्यमानः सोऽहर्निशं भ्रमति ।

—नास्ति दैवज्ञो भवान्, पुनः कथं परीक्षितवान् तम् ?

व्यवसायी त्वस्मि, ग्राहक-मुखाकृतिं स्वर-सौपानतर्तिं च विवेच्य तदन्तर्भावमवगन्तुमभ्यस्तोऽस्मि । चौरो दुराचारी वा कदापि सम्मुखं नैव तिष्ठति, न चाभिपश्यति । चिरकालात्प्रतीक्षते सः, सत्वरय तावत् ।

स्वामिन् ! अद्भुतोऽविश्वनीयश्चायं प्रसंगः । पतिरद्य स्वभार्या-सौन्दर्यं परस्मै प्रदर्शयिष्यति ।

–धर्ममर्यादायां विहितं कर्म पुण्यमेवास्ति । परमसौभाग्यमनुभवति मयि स्वाभिमानमुदेत्यद्य यत्-त्वादृशीं सुन्दरीं पत्नीरूपां प्राप्तवान्नहम् ।

–प्रभोरिच्छा बलीयसी''—इति कथयन्ती कक्षे प्राविशत् ।

प्रतीक्षारतः श्रेष्ठी व्यचारयत्—''अद्यावधि मणिरत्नानां प्रभां परीक्षमाणोऽप्यहं वास्तविक-प्रभां नावाऽगच्छम् । प्रस्तराणां सततं मूल्यांकनपरश्च नितरां पाषाण एवाभवम् । निजगृहे विद्यमानामेव हीरकप्रभां परीक्षितुं नाऽपारयम्, न च निरणयम् तस्याः मूल्याकनं कदापि । येषां समीपे दैनंदिनभोजनस्याप्यभावः, शरीरावरणाय हस्तपरिमितमपि वसनं न विद्यते, ते दरिद्रा अपि सन्ति सौन्दर्य-परीक्षकाः ? स्वकीयेऽज्ञाने नितरामन्वतपत् श्रेष्ठी ।

तदन्तरे लक्ष्मीरिव शुभलक्ष्मीः स्वर्णमण्डितेव समक्षमुपस्थिताऽभवत् । श्रेष्ठिना जीवने प्रथमबारमद्य सौन्दर्यान्तस्तलं निरीक्षितम् । तत्क्षणं स्तब्धस्तन्मयश्चाऽभवत् श्रेष्ठी ।

–काऽज्ञा मदर्थम् ?

–शुभे ! आजीवनमवर्ते ह्यज्ञानीवाहम् । गृहे देदीप्यमाना हीरकप्रतिमैव न मूल्यांकिता मया ।

–चरणधूलिरहं तु भवतः ।

–नहि, चूडामणेरनर्घ्यरत्नं त्वम् ।

–भवन्तमाप्य धन्यास्मि जीवने । अतिथेः प्रसादाय सर्वस्वसमर्पकं भवादृशं अतुलनीयत्यागपरायणं प्राप्य का नाम धन्या न भविष्यति । देवोपमो भवान् ।

–शुभलक्ष्मि ! एहि तावत्, प्रतीक्षतेऽतिथिः ।

महासतीं दुर्गां ध्यायन्ती पतिसहाया सोपवनमगच्छत्, आसीद् यत्र प्रतीक्षमाणो बिल्वः । तं संबोधयन्नुवाच श्रेष्ठी—''अतिथे ! समुपस्थितेयं सौन्दर्यराशिः, यद्-दर्शनाय नितरां विकलायसे ।

सहसोन्मीलिते नयने बिल्वेन । अधुनातितरां विराजते स्म शृंगारसुसज्जिता सा सुन्दरी । स्वर्णिमभाले कमलाकृति कस्तूरीतिलकं रतिविलासोद्दाम विभावयति स्म । नयनाञ्चलनेपथ्यात् तिर्यगीक्षणपरायणा कर्पूराञ्जनरेखा कामचापप्रत्यञ्चेव

कर्णाऽवम्बिताऽवर्तत। भास्वरं नासामौक्तिकं चाऽधरबिम्बं चुम्बयत् प्रभया चिबुक-पर्यन्तं प्रसृतमासीत्। अधराऽरूणिमा धवलदन्तावलिषु प्रतिबिम्बितो दाड़िमबीज स्मितमाभासयति स्म। हरितरेशमपरिधानान्तरिता तदीया स्वर्णिमतनुः श्यमललता-प्रत्युप्तविद्युत्सुमनदीपावलिरिव देदीप्यते स्म। उरसि विकीर्णं चन्दनरजो मलया-निलगन्धमतिवाहयति स्म। प्रत्यंगदीप्तविभूषणकान्तयो मदनदीपावलय इवं युवक-मानसानि पंतगायन्ते स्म।

यदा संपूर्णरूपराशिं सुतरां निपीय बिल्वोऽपश्यत् तस्याः नयनसामुख्यम्, तदानीमज्ञातशक्त्या तदन्तस्तलाद् दीप्तिज्वार इवोदभवत्, तिरोहितञ्च वासनाऽव-रणम्।

बिल्वान्तस्तलाद् ध्वनितं यत्—'किं पश्यसि नयनयोः! अनयोरेव प्रसृता विषय-विषाक्ता मदधारा मानसमुद्वेलयति नित्यम्। यदि नाऽभविष्यताम् रूपलोलुपे नयने, तर्हि साधकः कदापि न व्यचलिष्यत् साधनापथात्।

भूयसा संयमितवान् चात्मानं बिल्वः, किन्तु तदानीं तच्चेतनायां पुनः प्राहरत् सात्विकस्वान्तः। —"अधुनापि लक्ष्यभ्रष्टोऽसि, नेदानीमपि भोगतृप्तं त्वदीयं चित्तम्? अतृप्तेन नावाप्स्यते कदाचिन्मुक्तिः! कामी त्वं, पतितोऽसि, नीचोऽसि। न कदापि विश्वसनीयोसि। चिन्तामणि-दीक्षातोऽपि न संस्कारितोऽभूः। स्वसौन्दर्य-विकृतिमूलादपूर्वत्यागात् चिन्तामणिना त्वयि मानवीयसंस्काराः प्रदीप्ताः, गुरूणा सोमगिरि-महात्मनाऽपि तिमिरकूपादुद्धर्तुमनवरतं प्रायतत, किन्तु त्वमियान्पतितोऽसि यत्-सौन्दर्यदर्शनलिप्सया मर्यादाश्चापि विलंघितवान्। नाधिकं त्वत्तो नीचः, पतितः संसारे। पश्य! अस्याः देव्याः महत्तेयं यत्-त्वादृश तुच्छस्यपतितचित्तस्य कलुषित दर्शनतृप्तये समुपस्थिताऽभूत्।

बिल्वस्यान्तस्तले शनैरुदीयमान-तेजसा तद्विवेकः प्रकाशितो जागृतश्चाभूत्। पश्चातापाग्नौ वासनाकालुष्यं व्यनश्यत्। स्वांतस्तपनमसहमानो बिल्वः सुन्दर्याः नयन-पथान्निजदृष्टिमितस्ततः परिवर्तितवान्। तदानीमभूत् दृष्टिगोचरश्चैको बिल्ववृक्ष-स्तीक्ष्णशूलकण्टकैरुपहसन्निव तत्रोद्याने। बिल्वतरूं विलोकयन् बिल्वो जगाम तदन्तिकम। मरूल्लत्पल्लवैः स्वकण्टकानि प्रदर्शयन् बिल्वतरु बिल्वं मूकोपहासैस्तुतोद —"रे बिल्व! किं पश्यसि? मदीयकण्टकानि?, पूर्वजन्मीयवासनारोमाञ्चानि तरुतनौ चापि प्रादुर्भूतानि। भक्तिफलं मधुरफलैर्दधामि, वासनानग्नतां च तरुतनुमूलाद् विभर्मि। भविष्यति त्वदीयं चेत् कीदृक् परिणामताण्डवम्?

रहस्यमवगच्छन् व्यचारयद् बिल्वः—"अहो! सर्वथाऽयं नयनयोः प्रमादः। वासनाद्वारे मनसश्चैते नयने एव विदारयिष्यामि। मित्र! बिल्वतरो! हितोपदेशाद् धन्योऽसि, त्वदीयकण्टकाभ्यामेव वासनाकुण्डे विदीर्णे भवताम्। एवं निश्चयन् बिल्वतरो निशितदीर्घकण्टके गृहीतवान् बिल्वः।

तदानीमेव श्रेष्ठी जगाद—"अतिथे! अपि तृप्तोऽसि सौन्दर्य-दर्शनात्।

—श्रेष्ठिन्! पतितप्राणी खल्वहम्। भवताऽपि पापात् नैव निवारितोऽद्य?

—अतिथे! अस्मत्पूज्योऽसि। द्वारस्थातिथेः प्रार्थनाऽवहेलना नितरां पापजननी भवति।

—"स्वकीयनयचापल्याद् विहितमद्य पापम्। नावश्यकता नयनाऽस्तित्वस्य—" इति कथयन्नुभयकरस्थशूले स्वनयनयोश्चुक्षुभे। तत्क्षणं रुधिरधारामिषेण वासना-गरलं प्रास्रवत्। वीक्ष्यैतदभूत् चीत्कारमुखरितं शुभलक्ष्माः मुखम्।

स्तब्धौ, हतप्रभौ चाऽवाङ्मयावभूताम् श्रेष्ठी तत्पत्नी च। बिल्वश्च प्रसन्नतया नृत्यन् गोविन्दनामकीर्तनं समुच्चचार। अद्भुतघटना-विस्मितः श्रेष्ठी नितरां व्यथित-मनाऽभूत्। ततश्च बिल्वमुपेत्य नम्रवचसाऽवोचत्—

—"अतिथे! किमर्थमनर्थं व्यदधाद् भवान्? सौन्दर्यदर्शनेच्छया समागतवान्, किन्तु प्राङ्गणेऽस्मिन्नेव सुन्दरनयने विदारितवान्?

शुभलक्ष्मीरपि रक्तरंजितं तदीयनयनयुगलं विलोक्य नितरां व्यथितमना मन्दं बभाण—"सामान्यकारणाद् इयान्ननर्थः"?

बिल्वो जगाद—"देवि! धन्यमद्य दिनं, तथा कृतकृत्यकं तदिदं दिनम्, यत् त्वयाऽद्य विबोधितः खलु पापपंकनिमज्जितः। आसम् विषयपंकिलकीटोऽहम् नितरां नीचः, न भविष्यामि कदाप्युऋणो भवत्प्रसादाद्। नार्यः एवाभवन् सदैव मदीय-जीवनप्रेरणाः।

दृष्टिविहीने जीवने किमवशिष्यते सुखम्?

—आसमद्यावधि निरन्ध एव। अपश्यतामेते नयने केवलमन्धकारम्। इदानी-मन्तर्ज्योतिरुद्भासितम्। नाहमीहे प्रकृतिलीलाव्यापारदर्शनम्, न च नारीत्वक्चारुत्व-विलोकनम्, अपितु गोपालरूपसागरे सततमवगाहनं करिष्यामि साम्प्रतम्। देवि! नाहमन्धोऽधुना, जाग्रतस्त्वतः परम्। त्वत्प्रांगण-प्ररूढेन बिल्वतरुणा प्रदत्ताऽद्य बिल्वायाऽमरता। त्वत्पुण्यपालितोऽयं बिल्वः संसारे परमपवित्रो भविष्यति। क्षम्य-ताम् देवि!—

इति निगद्य शान्तभावेन गोपालमंत्रोच्चारणपूर्वकं प्रतस्थे । शनैः शनैरुपवनाद् बहिश्चरणानि चाग्रेसारयामास । श्रेष्ठिसहाया शुभलक्ष्मीः व्यथितमनसा विलोकितवती, दूरं यावद् विलोकितवती ।

+ + +

१३

बिल्वस्य नेत्रहीनता-प्रसंगो नगरे सर्वत्र प्रासरत् । सर्वे तद्दर्शनाय उत्ताम्यन्ते स्म । मार्गे स्खलन्, पतन् पुनरुत्थाय चलन् प्रस्तराघातं पादयोर्वहन् निरन्तरमग्रे ससार बिल्वः । तदीयमुखारविन्दात्केवलमेकमेव नाम मुखरितमासीत्—"दयतु-दयतु हे कृष्ण ! मुरारे !"—। चेतनमचेतनं सर्वञ्चापि संबोध्य श्रीकृष्णनामोच्चारणं करोति स्म नित्यम्। मंदिरप्राङ्गणे कृष्णकीर्तनावसरे भावतन्मयं यन्नृत्यं तेन प्रस्तुतम्. तद् विलोक्य एकत्रितलोकास्तुमुलनादेन जयघोषमुदूचुः—

—"भक्तवत्सलः श्रीकृष्णो जयतुतराम्" ।

—भक्तशिरोमणि बिल्वमंगलो जयतुतराम् ॥

स्वकीयजयघोषं निशम्य विषादपूरितं बिल्वमनः । किन्तु कस्यापि स्वरस्य प्रतिवादं नाचरत् । पुनर्मनस्येवालपत्—"गोपाल! क्वासि ? गुरुणा विश्वासितं यत्-सदैव मदन्ते वससि, मया सह विचरसि च, किन्तु कथं न दृष्टिपथमायासि ? त्वां बिना जीवितुमशक्नोमि, स्थातुं न पारयामि, यत्र गमिष्यसि तत्रैवाऽगमिष्यामि" ।

एवं विलपन् कुष्णायास्तीरे तीरे कृष्णमन्वेषणपरो वनं प्रतस्थे । गहनकानने चैकाकी यात्रारतः सो निरन्तरं मुखात् श्रीकृष्णनामकीर्तनं समुच्चचार प्रतिश्वासम् । शरीरमतीव श्रान्तमभूत्, शोथायितौ पादौ, क्षुभितनिशितशूलाग्रैश्चरणतले विद्धे चाभूताम्, परन्तु स्वकीयप्रियान्वेषणतत्परः सः परितो भ्रमन्नासीत् । अद्भुतसाधकस्य तस्य क्षुधापि विलुप्ता, तृषापि निरस्ता । यदा कोऽपि पथिकस्तं भोजनायन्दवेदयिष्यत्, तदैकमेवोत्तरं मुखरी कुर्वन्—"जयतां कृष्णः",अग्रे चासरिष्यत् । श्रीकृष्णस्यानुपमसौन्दर्ये

निमग्नः सः कृष्णमयः प्रतीयते स्म । अन्तर्बहिः सर्वत्र कृष्णान्वेषणाय व्यथितस्य तस्य विदीर्णनयनयोरानन्दाश्रूणि प्रवहन्ति आसन् । कीर्तनस्वरस्पर्धिता तस्याश्रुधाराऽनवरतं स्रोतस्विनी अजायत । न स्वरो विरमते, न चाश्रुधारा ।

गहनकानने केनाप्यचेतनवस्तुना विघट्टितोऽवदत्—कृष्ण ! किं नालपसि मया समम् ? अपि रुष्टोऽसि ? भूयसा मयाऽपराद्धश्चावमानितस्त्वं, तस्मादेव दण्डयसि माम् । पश्य गोपाल ! त्वद्दर्शनाय संसार-दर्शनाद् अवरुद्धे मया नयने । अन्यत् किमपि नैव दिदृक्षुरहं, केवलं त्वद्दर्शनमीहे । क्षम्यताम् ममापराधान् । गोपाल ! दीनाश्रयस्त्वम्, पतितोद्धर्ता च; पतितात्मानं मामंगीकुरु । जानाम्यहं यत् नासि दूरम्, अत्रैव क्वचित्तिरोहितस्त्वं अधमान्धस्य कौतुकं विलोकयसि, मन्दमुपहससि च । यदि प्राप्यतेऽस्मिन्नेव त्वया सुखं, तर्हि भूयसोपहस्यताम्"—

इति विलपन् अग्रेचचाल कियद्दूरम् । पुरतश्च वटवृक्षविटपावरुद्धो न्यपतद् भूतले, किन्तु तदापि 'कृष्ण गोपाल' नामैव मुखरितं बिल्वमुखात् । वटवृक्षपर्णैरपि तालनिनादपूर्वकं तुमुलं प्रतिध्वनितं कृष्णनामकीर्तनम् । विपिनव्याप्तेन कीर्तनघोषेण बिल्वहृदयमानंदगद्गदमभूत् । प्रतिरामकूपात्कृष्णनामकीर्तनं उदीरितं तदानीम् । अभूद् बिल्वोऽर्द्धतन्द्रितो विमोहितो विस्मृतदेहाध्यासश्च तदानीं कीर्तनवशात् ।

एतस्मिन्नवसरे बालकस्य पीयूषवर्षी मधुर-स्वरो बिल्वकर्णयोः अपतत्—"भो सूरदास महोदय ! अप्यतीव कष्टायते भवान् ?

खण्डितोऽभूत् कीर्तनक्रमो बिल्वस्य । सहजस्वरेण जिज्ञासितं बिल्वेन—"भो! कस्त्वम् ?"

—एकबालकोऽहं तु ।

—बालकः ?—आनन्दगद्गदमभूद् बिल्वहृदयम् । पुनश्चापृच्छत् बिल्वः—"किं नामधेयोऽसि ?

—हसितुमारेभे बालकः ।

—अरे ! कस्माद् हससि ?

—सूरदासमहोदय ! अहमपि नैव जानामि मदीयनाम ।

—मिथ्या वदसि ।

—कथं न विश्वसिति भवान् ?

—त्वत्परिजनाः केन संबोधनेनाऽह्वयन्ति त्वाम् ?

–सूरदास महाभागाः ! अद्भुतेयं मदीयकथा । एकोऽहं, परन्तु सर्वे जनाः पृथक् पृथक् रूपेणाऽह्वयन्ति माम् । येनापि नाम्ना संबोधयन्ति ते माम्, तदेव नाम जायते मदीयम् । साम्प्रतं तु इयन्ति नामानि प्रचलितानि यत् वास्तविकं नामैव विस्मृतं मया । बिल्वोऽपि व्यहसत् तदीयसहजसारल्ये ।

–भो सूरदास ! यथेच्छमाह्वयतु मां भवान् ! यथारुचि नामकरणं प्रस्तौतु ।

–कृष्ण नाम्ना संबोधयिष्यामि त्वाम् ।

–अप्यतीव रोचते भवते नामेदम् ?

–किं नैतत् तव मोदकरम् ?

–अतीव मधुरम् । मज्जननी चापि कृष्णानाम्नैव मामाह्वयति ।

–चेद् वर्तते कृष्णभक्ता तव माता ?

–इदं तु नैव जाने ।

–अधुना बालकोऽसि ! बालके च भगवान्निवसति ।

–हे सूरदासाः ! मा मां भ्रामयन्तु प्रसंगेऽस्मिन् ।

–अस्तु कृष्ण ! ज्ञापय तावत्, क्वास्ति त्वदीयगृहम् ?

–अयि सूरदासाः ! यत्र कुत्रापि खेलाम्यहम्, तत्रैव गृहं मन्ये । साम्प्रतं भवदन्तिकस्थोऽहम्, चेदत्रैव गृहम् ।

–"सुष्ठु ते विचाराः । यदि संसारोऽप्येवमेव जानीयात् तर्हि नहि भवेत् कापि समस्या"—इति कथयन्नभूत् चिन्तितो बिल्वः ।

–अस्तु सूरदासाः ! भवतां पुनः कुत्र गृहम् ?

इदं तु नाहं जाने, चिरन्तनयात्री चाहम्, वर्तिष्येऽनवरतं यात्रारतः । यत्र कुत्रापि विश्रमामि, तत्रैव गृहंमन्यमानो विमुह्यामि ।

–बालकोऽप्यहसत् सूरदासस्याज्ञतायाम्

–अस्तु कृष्ण ! ज्ञापय तावत्, किं करोषि ?

–भो महाशय ! किं कर्तुं शक्नोमि ?

–किंचित्तु करोष्येव ?

–गाश्चारयामि ।

–एततकार्यं रोचतेतराम् तुभ्यम् ?

एतदतीवाऽह्लादजननम् । कदाचित् कपिलां, जातु कृष्णां, गौरीं, बभ्रुवर्णां, सिन्दूरत्वचीयां च पश्यन् पश्यन् नितरामामोदमावहामि । सानन्दं यापयामि समयं, तासामन्तरे ।

—तावदत्र कथमागतोऽसि ?

—गाश्चारयन्नेव इत आगतवान् । भवन्तमस्यामवस्थायां वीक्ष्य व्यचारयम् यत्-एकाकी, असहायश्च भवान् ।

—अप्युदिताऽस्ति दया त्वद्हृदि ?

—भो ! सूरदासाः ! ये मया सह प्रेम्णा व्यवहरन्ति, तेष्वहमपि स्निह्यामि । सकृत् मामात्मीय मन्यते यो, न तं कदापि परिहरामि ।

—बिल्वश्च बालकस्य मनोहर-गंभीरालापं निशम्य मनस्येव व्यहसत् ।

—भो ! भोजनं कुतः करोति भवान् ?

—बुभुक्षैव न जागर्ति ।

—पयोऽपि न पिबति ?

—तृषैव न तुदति ।

—"भो ! सूरदासाः ! आनयम् भोजनं भवते, वर्ततेऽतीव स्वादिष्टं, मिष्ठान्नमपि विद्यतेऽत्र, गृह्णातु तावत्"—सानुरोधं भणितं बालकेन ।

—कृष्ण ! नैव कस्मैचिदपि रुचिः ।

—कथं पीडयति भवान्नेवं शरीरम् ?

—मदीयकृष्णो वियुक्तो मत्तः, तमेवाऽन्वेषणाय भ्रमामि ।

सूरदासाः ! अतीवाद्भुताः भवन्तः, कदाचित् कथयन्ति यत् बालके भगवन्निवासः, जातुचित्तु बालानुरोधमपि न मन्यन्ते ।

—अतीव चतुरोऽसि ।

—भोजनं गृह्णन्तु, शीतलजलमानीय सत्वरमायामि ।

—दृढं हठमावहसि ।

—बालहठोऽयम् । इमं भवदीयकृष्णहठं मन्यमानो भवान् गृह्णातु भोजनं जलं च ।

—मा वियुङ्क्ष्व मां साधनापथात् ।

–"जयताम् कृष्ण":––इत्युदीर्य गृह्णातु भोजनम् ।

–सूरदासश्च बालमुखात् मुखरितं स्वरमाधुर्यं निपीय नितरां भावविभोरोऽभवत् । अमृतधारास्नापितमिवाऽभूत् तदन्तःकरणम् । साग्रहं निवेदितवान् सः––

–"सकृद् भूयो भण कृष्णनाम" ।

–"प्रथमं भोजनं गृह्णातु"—इति निगदता बालकेन स्वकरेण भोजनं प्रस्तुतम् । अनीप्सितोऽपि बिल्वो नाऽशक्नोद् अस्वीकर्तुम् । प्रेम्णाऽस्वादयत् बालकर-मुखेन भोजनम् । विलक्षणतेव प्रतीताऽभूदद्यतनीयभोजने आस्वादमाधुर्ये च । भोजनानन्तरं शीतलजलं निपीय परमतृप्तिमन्वभवद् बिल्वः । सकला देहविकलता क्षणेनैवाऽपसृताऽभवत् । ततश्च साग्रहं पुनर्न्यवेदयत्—"साम्प्रतमुच्चर कृष्णनाम" ।

–विहस्योवाच बालकः—"जयताम् कृष्णः" ।

बिल्वोऽपि कृष्णनाम संकीर्तयन् नर्तितुमारेभे । बालकेनापि वेणुवादनेन तत्स्वरसाहचर्यं समाचरितम् । दिगन्तगगनं मधुरसंगीतेनाऽपूरितमजायत । छायाव्याजेन मेघशकलाः स्वोल्लासं प्रकटितवन्तः । विविधविहगवृन्दाश्चापि तदनुकूजनं व्यदधन् । वनस्पतिपर्णकुलान्यपि समीरसंगानि आनन्ददोलायमानान्यजायन्त । विमोहिता सम्पूर्णैव प्रकृतिः । रसायाः प्रत्येककणं कृष्णनाम-रसाञ्चितं सार्थकमभूत् ।

यदा च व्यरमद् वेणुसंगीतं, तदा नर्तनसहितं बिल्वोच्चरितं कीर्तनमपि विराममापत् । बिल्बोऽवदत्—

–"सुष्ठु तव वेणुवादनम्, कुतः शिक्षितम्" ?

–भो ! सूरदासाः ! अस्मिन्नेव वने धेनून् चारयन् अभ्यसितोऽहं वेणुवादने । अस्तु-गच्छामीदानीम् ।

–गच्छन्नसि ?—सोद्विग्नमवदद् बिल्वः ।

–प्रतिदिनमायास्यामि त्वत्समीपम्, भोजनञ्चापि त्वदर्थमानेष्यामि ।

–कृष्ण ! मा वह खेदं भोजनाय ।

–भो ! भावुकाः ! निरशनाः वर्तिष्यन्ते ?

–त्वसंभाषणेनैव तृप्तिमावहामि ।

–"अयि महाशयाः! वार्तालापेन नाऽपूर्यते चोदरम्"—इति निगद्य गतवान् बालकः ।

–ओ कृष्ण ! गतोऽसि किम् ?

–प्रत्युत्तरमनवाप्य नितरामुदासीनोऽभवद् बिल्वः । कतिपयक्षणानन्तरं पुनः कीर्तनपरायणोऽभूत् । बालकः प्रत्यहं निश्चितसमये समागच्छत्, स्वकरेण सूरदासमाददत् स्वादिष्टभोजनम्, शीतलजलमपाययत्, ततश्च वेणुनिनादेन विमोह्य अपरेद्युरागमनाय चाश्वास्य न्यवर्तत ।

एवं प्रतिदिनं प्रतीक्षतेस्म बिल्वः । एकदा विलम्बे सति विक्षुब्धमभूद् बिल्वमनस्तदानीं तद्विवेकेन विवेचितम्—"पुनर्व्यामोहमावहसि ?"

–साधनापथेऽग्रसरोऽस्म्यहम् ।

–स्त्रीव्यामोहं विहाय वनमागतोऽसि, किन्तु वनेऽस्मिन् पुनर्बालकमोहान् भ्रमितोऽसि । त्वदीयस्वान्तेऽधुनाप्यवशिष्टास्ति भोगाकांक्षा । स्वादिष्टभोजने तृप्तिमनुभवसि, शीतलजलेन संतापं प्रशामयसि । बालकमिषेण पुनः परिवारममतामनुबन्धयसि ।

–अपि निषेधनीयं बालकागमनम् ?

–यदीप्सितलक्ष्यं प्राप्तुमिच्छसि चेत्परित्याज्योऽयं मोहोऽपि ।

अथ च विमनस्कोऽपि विवेकादेशमंगीकृतवान् बिल्वः, विनिश्चितवांश्च यदद्य बालकानीतं भोजनं नात्स्यामि, पयोऽपि न पास्यामि, न च किंचित् संभाषिष्ये । यतोहि स्वकीयमधुरवाण्वा बालको मां पुनः संसारचक्रे ग्रन्थयन्निवाचरति । भूयसा धिक्कारितवान् स्वान्तं सो यत्-यदर्थं विसर्जितवान् चिन्तामणिं, भोगपरिसरं, सिद्धान्ततीश्च; यस्य कृते जगतो विमुखीभूय नयने विदीर्णवान्, तमेव विस्मृत्याधुना व्यामोहपथे पुनः प्राविशम्, अज्ञात-बालकस्य मधुरालापैर्विमोहितो व्यचलम् साधनापथात् । अहो मे बालिश्यम् ।

एवं विचरति बिल्वे विचारसागरवीचिषु, बालकस्तमुपेत्य मधुर-गिराऽवोचत्—"जयतां कृष्णः भो ! सूरदासाः ।

–किन्तु नोत्तरितम् बिल्वेन ।

–महाभाग ! कथं नोच्चार्यते कृष्णनाम ?

–अपसर त्वमितः ।

–किमपराद्धं मया ?

–मां भ्रमयसि ।

–अयि भावुकाः ! कथमद्य भ्रान्ताः भवन्तः ?

–आसम् अनासक्तः, निर्मोहश्च विचरन्नासं धरायाम्, त्वयैव मोहापन्नोऽभवम् भूयः ।

–भवतां सेवाकामनया एवाऽयामि अहं तु ।

–"नाहमीहे सेवाम्"—दृढ़तयाऽभणद् बिल्वः ।

–अयि भावुकाः ! मिथ्या कथयन्ति भवन्तः, मां विना स्थातुं नैव शक्नवन्ति ।

–कृष्ण ! मां मा विकलय । सकृदेवोत्तरितम् यत् नैव सम्बन्धरावयोः कश्चित् ।

–भो सूरदासाः । किमर्थमाक्रोशन्ति ? संभवतो बुभुक्षा बाधते, गृह्णन्तु भोजनम् ।

–नैवाऽत्स्यामि ।

–अद्यास्ति विशेषस्वादिष्टमशनम् ।

–कथं मामतिवाहयसि ? धैर्यविहीनोऽवदद् बिल्वः ।

–जलमप्यतीव शीतलम् ।

–"भवतु"—सोपेक्षमुत्तरितवान् सः ।

–वेणुवादनमपि नैव श्रोष्यन्ति ?

–मौनमालम्बितं बिल्वेन ।

–भवद्-भगवान् सदेमां धारयति स्वाधरे । अस्याः स्वरतरंगेषु सृजननर्तनानि प्रलयदृश्यानि चोपस्थीयन्ते । स्थावर-जंगमा सर्वा सृष्टिर्भवति संमोहिता वेणुसंगीत-माधुर्येण । भवांश्चापि निशम्य भवति तन्मयः । भो सूरदास ! वेणोः स्वरमाधुर्ये तन्मयतावशाद् एव कृष्णसायुज्यमाप्यते ।

–बिल्वो मनस्येव व्यचारयद्—"सुष्ठु वदति बालोऽयम्" किंचित्कम्पितौ बिल्वस्योष्ठौ, किन्तु नैव मुखरितावभूताम् ।

–महाशय ! कस्यां चिन्तायां निमग्नो भवान् ?

–तवैव चिन्तायाम् ।

–मद्विषये ? —साश्चर्यमपृच्छत् सः ।

–बलाद् हृदयमाकर्षयसि मे ।

–तस्मादेव भवता 'कृष्ण' इति नामकरणं विहितं मे ।

–कृष्ण ! गोपालसायुज्यमीहे केवलम् ।

कुत्र वास्तव्यः सः ?

–नाऽवगन्तुं शक्नोषि ।

–किंचित्तु ज्ञापयतु निवाससंकेतम् ।

–एतत्तु नाहमपि जानामि ।

तत्पुनः कुत्र यास्यति भवान् ?

–सर्वत्र व्याप्तः सः ।

–अत्रापि तावदागमिष्यति सः ।

–अरे ! नाऽयास्यति, रूष्टोऽस्ति मत्तः ।

–भो महाशय ! श्रूयते यद् वृन्दावने वसति सः ।

–वृन्दावने ? अतीव दूरतरं तावत्—नैराश्यमावहन् जगाद सः ।

–अपि जिगमिषुर्भवान् ?

–प्रफुल्लितं बिल्वस्य हृत्कमलं, परमग्रिमक्षणे विषाद-ग्रसितमभूत् । असामर्थ्यं प्रकटयन्नुवाच सः—

–वृन्दावनं प्राप्तुमक्षमोऽहम् ।

–कथम् ?

–किं न पश्यसि ? दृष्टिहीनोऽहम् ।

–अहं प्रापयिष्यामि ।

–नहि रे ! कियद् दूरं साहाय्यमाचरिष्यसि ।

–वृन्दावनं यावत् ।

–त्वत्परिजनास्त्वां कथमाज्ञापयिष्यन्ति इयद्दूरगमनाय ?

–अयि सूरदासाः ! नैतत् चिन्तनीयम्, प्रेमोपासकस्त्वहं, मयि ये स्निह्यन्ति चात्मीयास्तेभ्यो नित्यं समर्पितः । गृह्णातु तावन्मद्यष्टिं प्रापयिष्यामि त्वीप्सितम् ।।

–अरे ! सत्यं भणसि ? —सोल्लासमुवाच बिल्वः ।

–अथ किम् ! सदा पवित्रं बालमनो, नासत्यं ब्रूयते क्वचित् ।

–विश्वासमाप्य बिल्वेन गृहीतं यष्टिकाञ्चलं प्रतस्थे हर्षत्वरान्यासैः पादै-वृन्दावनं प्रति । बालकं मनस्येव प्रशंसतः किंचिद् दूरं प्रयातस्य बिल्वस्य बुद्धौ स्फुरितं यद्—"अहो मे सौभाग्यमद्य, बालमिषेणभगवता पूरितं मदीप्सितम्, कृतकृत्यम-भूज्जीवनम् ।

एवमालोचयन्तं सूरदासमब्रवीद् बालकः किंचिद्दूर-गमनानन्तरम्—"भो सूरदासाः ! संप्राप्तमिदं वृन्दावनम्" ।

चकितोऽभवद् बिल्वः, नाऽवगच्छद् रहस्यं तन्मतिः । सहसा विहाय यष्टिं दृढ़मग्रहीद् कराभ्यां बालकम् । तदानीं तस्य स्पर्शात् सम्पूर्णतनुः रोमाञ्चिताऽभवत्, पुलकितरोमावलिमिषेणाऽभवदंकुरितो हर्षोद्गमः ।

हस्तपिञ्जराद् विमोचन-प्रयासतत्परः सः उवाच—"अयि भावुकाः ! किमिदं कुर्वन्ति ?"

–नैव मोक्ष्यामि"—ग्रहणविधिं दृढीकुर्वन्नुवाच सूरदासः ।

–किमिदमाचरन्ति भवन्तः ?

–अद्यावधि वंचितस्त्वयाऽहम् ।

भो सूरदासाः ! भ्रमिताः भवन्तः, अहं तु त्वदीयकृष्णः ।

कृष्ण ! अद्यावधि स्वकीयपरिचयादनभिज्ञं मां त्वं सदा वंचितवान्, मूढ़श्चाहं प्राप्याऽपि त्वां भ्रमितोऽभवम् । अतः पूर्वं दूरं पलायितः, किन्तु नातः परं दूरापसरणे क्षमोऽसि ।

–मया तु सेवाऽचरिता सदा, भयांश्च मामेवाक्रोशति ।

–नैवाऽभिनयसाम्प्रतमधिकम् । सम्यक् परिचितं मया ।

–मधुरस्मितेन भासितं कृष्णाननम् । तत्क्षणमलौकिकप्रकाशः प्रासरद् वातावरणे । बिल्वो दिव्यदृष्टिं प्रापत्, अपश्यच्च सत्यचैतन्यसौन्दर्यम् । विराट्-दर्शनं प्राप्य अपूर्वानन्दविभोरोऽभवद् बिल्वः । किमपि चाभिव्यङ्क्तुमक्षमे तस्मिन् प्रतिरोम परमचेतना समाहिता । स्तब्धस्य तस्य नयनाभ्यामानन्दधाराच प्रवाहिता ।

\+ \+ \+

१४

वृन्दावन-धरा सदा भक्तिश्रद्धानन्दपूरिता वर्तते। प्रत्येकदेशदिशातः समागताः भक्ताः कृष्णलीलाधाम्नि वृन्दावनेऽस्मिन् स्वान्तस्तपनं शामयन्ति। साधुभक्त बहुलेयं नगरी सत्संगकीर्तनमुखरिता वर्ततेऽहर्निशम्। बिल्वोऽप्यर्वतत सदानन्दनिमग्नः। परमचैतन्यं सत्यसौन्दर्यं चानुभवन् प्रशंसन् विमुग्ध इवाऽभवद् भक्तबिल्वः। कृष्ण गुणानुवादमुच्चरन् नितरां पुलकितः स प्रावोचत्–"प्राणिमात्रे वर्तते तस्या सत्ता, परोपकरो दीनसेवा चैव तत्प्राप्तेः सहजोपायः। परपीडां वीक्ष्य यश्च भवति स्वयं पीड़ामयस्तस्यैव द्रवितमनस्तले विराट्चेतना समुदेति, समवतरति वा! तदैव सत्यम्, तदेव शिवं, अनुपमसौन्दर्यञ्चास्ति।"

बिल्व-प्रवचनं श्रोतुमत्सुका जनराशिः सदा तं परिवारयति। साधनाप्तं अनुभूतं परमसत्यविवेचनामृतं कर्णयोर्निपीय नितरामामोदत श्रद्धालु समुदायः। ततश्च जयघोषैर्विभूषयति बिल्वम्, किन्तु नैतस्याद् हर्षमन्वभद्, बिल्वो न च कश्चिद् विषादम्।

एकदा यमुनातटे स्ननिरतो बिल्वोऽशृणोत् यात्रिणामालापम्—

"अद्यास्मिन् लीलाधाम्नि समागता भगवती चिन्तामणिः" निशम्यैतद् धैर्यधारणाक्षमः सोऽपृच्छत्–"कुतः समागता सा देवी?"

–भो सूरदासाः! दक्षिणदेशादायाता।

–अतीव हर्षस्य विषयोऽयम्।

–अपि परिचिनोति, जानाति भवान्?

–भगवद्भक्तानामहं भक्तः, तर्हि कथमपरिचितो वर्तिष्ये भक्तनामतः?

–तदानीमेवाऽन्य-यात्रिणा भणितम्–"आजीवनं वेश्यावृत्तिराचरिता तया, साम्प्रतं च भगवच्छरणमालम्बितम् ।

श्रुत्वैद् विषाद्-ग्रसितो बिल्वः, परं न कांचित् प्रतिक्रियां प्रास्तौत् । यात्रिणा पुनर्भणितम्–"पापात्मापि कृष्णनामपीताम्बरं परिधाय पुण्यात्मा संजायते ।"

एतत्कथने प्रत्युत्तरितमन्ययात्रिणा–"जातिजन्मानुसारं कर्म नैव पापम्, अपितु पुण्यमस्ति । महात्मा सा, मयाऽजीवनसंचिता सम्पदा प्रभुचरणयोः समर्पिता, दीनार्त-त्राणाय प्रस्तुता । सम्प्रत्ति ब्यामोहः सहजेन न ध्वंस्यते । विपुलज्ञानिनोऽपि माया-जालादस्मात् नैव विमुक्ताः विरक्ताः वाऽभवन् । नाऽपारयत् कोऽप्येनं त्यक्तुमैश्वर्यलोभम् । परोपकारेण दीनार्तसेवनेन च संचितं तयाऽतीवपुण्यम्, तस्मान्नैव पतिताऽस्ति सा । जात्या नैव कोऽपि पतितो हीनो वा, पारिवारिकधर्मपालनं नैवाऽधर्मः ।

एवं निशम्य बिल्व उवाच–"जयोऽस्तु कृष्णस्य", ततश्च प्रथमयात्रिणम-पृच्छत्–"कुत्र निवसति सा" ?

–गोस्वामिनो भवने ।

बिल्वस्तु प्रतस्थौ गोस्वामिभवनं प्रति वार्तालापरतान् पथिकान् । अपार-हर्षगद्गदोऽभूद् इदानीं बिल्वो व्यचारयच्च–"संम्प्रतं प्राप्स्यामि तस्याः साक्षात्कारम्, यया चिन्तामणिना सन्मार्गं प्रेरितोऽहम्, ममताऽलावितश्चाऽभवम् । पितरावपि य संकल्पं साधयितुमक्षमवभूताम्, जातिः समाजो मित्रबान्धवाश्चापि किंचित् प्रयास्य पराङ्मुखा अभवन्, तमेव संकल्पं चिन्तामणि सहजस्नेहेन संदेशितवती, प्रेरितवती संपोषितवती च । तत्परिणामतोऽधुनाऽहं कृष्णसौन्दर्यमन्वभवम्, सत्यदर्शनमलभे, चैतन्यानन्दशिवार्णवे अवागाहम् ।" एवं विचारयन्, मनस्येव सहस्रशो नमन् गोस्वामि-भवनं प्रापद् बिल्वः ।

सेवकं संबोध्य न्यवेदयन्–"कश्चित् सूरदासः चिन्तामणिदर्शनाय प्रतीक्षते द्वारि ।"

संदिष्टा चिन्तामणिश्च सर्वव्यापारमपहाय यथास्थित्यामेव समागता द्वारि पूर्वविदित सर्वाभिप्रायेव । बिल्वमुपगत्य प्रणमन्ती जगाद–"आभ्यन्तरे समागच्छतु ।"

–भगवति ! कस्तावद् अन्तरो बाह्याऽभ्यन्तरयोः ?

–बहिरेव समुपविष्टाऽभवत् चिन्तामणिर्वेदिकायाम्, समालपच्च–"सफलमभूत् भवज्जीवनम्"।

–भवत्याः प्रसादोऽयम्।

–भक्तराज ! सामान्यनारी एवाऽहं तु।

–देवि ! यत् किंचिदवाप्तं मया, तत्सर्वं भवत्प्रेरणायाः मधुरफलम्।

–महात्मा भवान्, मत्सकाशे तु केवलमासीत् ज्ञानम् संस्कारसौन्दर्यञ्च, किन्तु भवता तु विहिता साधना, साधनाऽभावज्ञानं शून्यं, संस्काराश्च निरर्थकाः भवन्ति।

–देवि ! इदानीं स्वमुखवीणातो विराट्चैतन्यसौन्दर्यात्मकं मधुरगीतं श्रावयतु, भवदीय स्वरेण सह चेतनायाः गहनसम्बन्धो वर्तते।

–प्रतिदिनं श्रावयिष्यामि, अधुना तु मद्गृहमपि वृन्दावनमेवाऽभवत्–एवं निगद्य मधुरस्वरैर्वातावरणं विमोहितवती चिन्तामणिः।

"वृथा खेदयसे बाले ! अहो चिन्तातुरा कथम् ?
श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥

द्रौपदी च परित्राता येन कौरव–कश्मलात्।
पालिता गोपसुन्दर्यः सः कृष्णः क्वापि नो गतः ॥

त्वं तु भक्तिः प्रियातस्य सततं प्राणतोऽधिका।
त्वयाऽहूतस्तु भगवान् याति नीचगृहेष्वपि ॥

श्रीकृष्णचरणाम्भोजं स्मर.....

श्रद्धालु-श्रोतृणां समुदायोऽभवत्तत्र एकत्रितः । गोस्वामी महोदयोऽपि समजायत तन्मयः । गीते समाप्तिगते पुष्पाण्यवर्षयन् सर्वे तयोरूपरि । लतान्तरितो बालकृष्णश्च मंदस्मितं विकीरितवान् ।

वस्तुतोऽभूत् मङ्गलमयो बिल्वमंगलः ।
चिन्तानाशिनी मणिरिव चिन्तामणिः ॥

——oo——